No. ४५५१

Title कात्यायन सूत्र पद्धतिः
१माध्याय:

Author श्री कात्यायनः
महीधरः

Extent ८६ Age

Subject सूत्र प. परिशिष्टं

कात्यायनसूत्रव्याख्याप्रथमाध्यायः

4551
F = 47

४५५१

~~४५५०~~

४५५०

स्वगृहे विद्यते पुत्रः पि तान्मातरे मृतः। केनापि तत्र चारब्धमग्निपिंडोदका[illegible] दिकं। पु
त्रः संचयनात्प्राक् चेत् गच्छेद् द्युसंगमाचरेत्। स्कृत्य तत्र वा सर्वं प्रेतकार्यं सपिंडनं। २
तथा। नयस्थाने पा वा माजे मृतस्तत्र च वसीस्कृतः। न तिष्ठति जनः पिंडं तत्रैतत्र च वर्तयेत्। १
मं चैर्दहो स्थि संचयनं च संस्कारस्तस्मिन्कृते तत्र नयादिना स्कातुम शक्तो यत्र यत्र
प्रेतकार्यं कृत् गच्छेत् तत्र तत्रैव पिंडोकदानादि सपिंडनांतं समापयेदिति पर्पः। सहगमने
विशेषः। अग्निवरु[illegible] स्त्रापा हो मोत्सुपस्थानं तापे वचा सरुदे। वह्निकर्तव्ये विना पिंडं तिलोदकं
पावदाशौचं प्रेतस्योदकं पिंडमेकं च दद्युः। ब्राह्मणे दशपिंडाः स्युः क्षत्रिये द्वादश स्मृताः। वैश्ये
पंचदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिताः। प्रेते न्यः सर्ववर्तोन्यः पिंडान्दद्युर्दशैव तु। प्राद्ध
कर्मणि संप्राप्ते पिंडमेको विधीयते। प्रवत्ताशौच[illegible] तंत्र स्तुप दिदर्शं प्रपद्यते। समाप्य
चोदकं पिंडान्स्ना नमस्नमाचरेत्। बौधायनः। उत्तरीयशिलापात्र कर्तृद्रव्यविपर्यये। पिंडोदकं
नवश्राद्धं पुनः कार्यं यथा[illegible] स्कारः। [illegible] चापेक्षा पात्रां [illegible] देशाविपर्यये। समपरूप्यापि
कुर्वीतनवैतदव रोपयेत्। [illegible] नवदशान्यतरेयादि। [illegible]
वरेत्।

मंगलानंतरारब्धप्रणका [illegible] अपीति

॥ॐ॥ महाश्रीगणपतये नमः॥ वि[illegible]श्वराय नमः॥ अथ शब्दो मंगलार्थः आनंतर्यार्थश्च॥ पण्डिता
पाध्यायस्य भाष्यादुद्धारितं लिख्यते। किंचित्पूर्वः पक्षः। अवांतरः पक्षः। सर्वः सिद्धांतपक्षो लिख्य
ते॥ अथ वेदाध्ययनानंतरं। अतः यतः कारणाद्वेदो धीतः अतो हेतोः अधिकारो वक्ष्यते॥
कर्मजन्यफलभोक्तृत्वं अधिकारः। तच्च कर्मणां फलवत्त्वे सिद्धे सति सिध्यति। नान्यथा। नक
स्यापि कर्मजन्यफलभोक्तृत्वापरपर्यायो ऽधिकारः सिध्यतीति प्राप्ते आह। फलयुक्तानि कर्माणि। फलं पुरुष
णीयं स्वर्गधनपुत्रादिकं। वेदोक्तानि कर्माणि फलस्य साधकानि भवंति। अतः कर्मणां फलवत्त्वात्कर्म
जन्यफलभोक्तृत्वापरपर्यायो ऽधिकारोपि पुरुषस्याग्निहोत्रादिकर्मसु सिध्यति। सकेषामित्यपेक्षा
यामाह॥ सर्वेषामविशेषात्। सर्वेषां कर्मानुष्ठानसमर्थानामसमर्थानां वा अंधमूकपंगुबधिर
देवऋषिपितृस्थावरकर्मसु अधिकारो भवति। कुतः अविशेषात्॥ फलार्थित्वस्य सर्वेषामविशिष्ट
त्वात्। फलं हि सर्वैरिष्यत एव। इति पूर्वः पक्षः। अवांतरः पक्षमाह। मनुष्याणां वारंभसामर्थ्यात्। वा
शब्दः पक्षव्यावृत्तौ। न सर्वेषामधिकारः किंतु मनुष्याणामेव। कुतः आरंभसामर्थ्यात्। मनुष्या एव हि यथा १

मंडनः। दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहं। अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितः। न कुर्यात्किं न के ज्येष्ठे सोदरे
श्रुतं कर्मारब्धुं कर्तुं समापयितुं समर्थाः न देवऋषितिर्यगादयः। तत्र देवानां देवतांतराभावाद
नधिकारः। ऋषीणां चार्षेयाभावादनधिकारः। तिरश्चां कर्म कर्तुमभावाच्च॥ एवं सर्वमपि मनुष्या
णामधिकारे प्राप्ते आह॥ अंगहीनाश्रोत्रियषंढशूद्रवर्जं। एतान्वर्जयित्वा मनुष्याणामेवाधिकारः।
मनुष्या अपि अंगेन चक्षुरादिना हीनास्ते कर्म कर्तुं न शक्नुवंति। अंधः आज्यावेक्षणं कर्तुं न शक्नोति।
मूकश्च मंत्रोच्चारणं। पंगुश्च विष्णुक्रमणं। बधिरश्च प्रैषश्रवणं। अनधीतोऽश्रोत्रियश्च किमपि मं
त्रसाध्यं कर्म कर्तुं न शक्नोति। षंढश्चानधीतवेदत्वादद्रव्यत्वादविवाह्यत्वाच्चानधिकारः। शूद्रस्यानधी
तवेदत्वादनधिकारः। समर्थस्य सतः शूद्रस्य कुतो नाधिकारो भवति। वेदे चैवंविधानि लिंगान्यपि संति।
शूद्रस्याधिकारे दृश्यते आधावेति शूद्रस्येति हविष्कृदाह्वाने। पुनः। अष्टावद्दघ्नः शूद्रस्येति पितृमेधे।
ननु अनधीतवेदत्वात्कथं अधिकार इत्युच्यते। अनुपनीतस्यापि अनधीतवेदस्यापि शूद्रः पत्नीवद्विषयवि
एवं प्राप्ते आह॥ ब्राह्मणराजन्यवैश्यानां श्रुतेः। शूद्रस्य कुतो नाधिकारः अनुपनीतत्वात् अनध्य
यनत्वात्स्वाध्यायश्रवणाभावाच्च शूद्रस्य नाधिकारः सिद्धं॥ ननु माभूदुपनयनं। अनुपनीतोऽपि पठिष्यति।
मैवं। शूद्रस्य वेदाक्षरश्रवणोच्चारणाधारणादिनिषेधदर्शनात्। श्रवणे त्रपुजतुभ्यां श्रोत्रपूरणं।

आ
र्वति।
ज्येष्ठ स्त्र
ह्वाविही
नेसति
आधेयं
तदनुष्ठा
या। पि
तुसत्य
पि अनु
ज्ञानेना
दधीतक
ह्वावना।

२

उच्चारणोऽजिह्वाछेदः। धारणोऽवधारी भेद इति। तथा। यद्युच्चारयेत् तस्य तत्तु रसना नं यद्यनुद्रस्तस्मात् शूद्रस
मीपे नाध्येयमिति। ननु आधावेति शूद्रस्येत्यादीनां लिंगानां का गतिः। उच्यते। रूपकाः विप
यांतितानि। रूपकारस्य हि सर्वकर्मसु अधिकारं वक्ष्यति। रूपकारस्याधानमिति। सव शूद्र
संबंधात् शूद्रः कथ्यते। तस्य मातामही शूद्रेति। ब्राह्मणो यजेत स्वर्गकामो यजेत एवमादि पुरुषं
संदिश्यते। पुल्लिंगनिर्देशात् किं पुरुषस्यैवाधिकारः इति प्राप्तेऽस्माह। स्त्री वा विशेषात्। स्त्री वा
ग्निहोत्रादिकर्मसु अधिकारिणी भवति। कुतः अविशेषात्। यतः स्वर्गकामो ब्राह्मण इत्येतत्पु
ल्लिंगं श्रूयमाणमपि न विशेषकरं। तेन विधिसंस्पर्शाभावादविवक्षितं। अतो न पुरुषस्यैवाधिका
रः। किं तु स्त्रिया अपि अधिकारः। पित्र्यार्थं भर्त्रादिदत्तसंभवाच्च। पत्या जितस्योभयसाधारणाच्चा
च्चा धर्मे वा र्थे कामे नातिचरितव्या। पाणिग्रहणाद्धि सह त्वं कर्मसु॥ दर्शनाच्च दृश्यते वा यमर्थो
वेदे। अथ वेदं पत्नी विस्रंस्यति। तथा च स्मृतिः। नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाप्युपोषणं। शु २

ऋषपतिभर्तरिं तेनस्वर्गेलोकेमहीयते।कुत्रपार्थिस्तष्ठपियजमानएवकर्ताविद्वत्वास्वतंत्रत्वा
त्।अतःसर्वंसमंत्रकममंत्रकंचयाजमानंयजमानै[illegible]वकर्तव्यं।आहत्यविहितंत्वाज्यावे
क्षणादिपत्न्याकर्तव्यंनान्यत्।तदेवंमंत्रहीनादिवर्जितानांब्राह्मणराजन्यवैश्यानांपत्नी
सहितानामग्निहोत्रादिकर्मसु अधिकार उक्तः॥ रथकारस्याधाने।रथकारस्याधाने
ऽधिकारोभवति।वर्णेषुरथकारः आदधीतेतिश्रुतेः।रथकारशब्दस्तुजात्यंतरएव।आधा न
मात्रेऽधिकारइतिप्राप्तेआह॥ नियतंवा।तस्यरथकारस्यनियतंनित्यंकर्माग्निहोत्रादिदर्श
पूर्णमासादिकंभवतिवकारात्काम्यंनैमित्तिकंवा।एवंप्राप्तेआह॥ नाभावादितिवास्यः।
रथकारस्यकारसर्वकर्मस्वधिकारोभवतीतियदुक्तंतन्न।कुतः अभावात्।रथकारस्यक
र्मसुलिंगानिनसंति।त्रैवर्णिकानांतुआधानंश्रुतं।कर्मसुलिंगानिसंति।कानिपुनस्तानि
लिंगानियेरथकारस्यापिकर्मसु अधिकारोवसीयते।उच्यते।आधावेतिशूद्रस्यअपी
वहृद्धःशूद्रस्यमस्तुशूद्रस्येति।शूद्रासंबंधाद्रथकारः अत्रशूद्रशब्देनाभिधीयते[illegible]।

तस्य मातामहीशूद्रेति विषयाणीति। वैश्याशूद्र्योस्तु राजन्यात् माहिष्योग्रौ सुतौ स्मृ
तौ। वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः। विन्नासु परिणीतासु। रथकारस्या
धानमात्रेऽधिकारपक्षे एतानि लिंगानि निर्विषयाण्येव स्युः। तस्माद्रथकारस्योत्तरकर्म
3 स्वधिकार इति सिद्धं॥ तथा चोक्तं याज्ञवल्क्यस्मृतिविवृतौ मिताक्षरायां विज्ञानेश्व
रेण। क्षत्रियेण वैश्यायामुत्पादितो माहिष्यः। वैश्याच्छूद्रायामुत्पादितः करणी।
करण्यं तस्यां माहिष्येणोत्पादितो रथकारो नाम जातिर्भवति। तस्य चोपनयनादि सर्वं का
र्यं वचनात्। यथाह शंखः। क्षत्रियावैश्यानुलोमानंतरोत्पन्नजो रथकारस्तस्याध्य
यनेज्यादानोपनयनसंस्कारक्रियाश्चाप्रतिषिद्धा रथसूत्रं वास्तुविद्याऽध्ययनवृ
त्तिता चेति सिद्धं॥ निषादस्थपतिगवेधुके धिकृतः। निषादस्थपतिर्गवेधुके चरावधि
कृतोऽधिकारी भवति। निषाद एव स्थपतिः अत्राधिकारी श्रुतिबलादनग्निमानपीति सिद्धं। २

कोऽवकीर्णिनो गर्दभेज्या। यो ब्रह्मचारी सन् स्त्रियं गच्छति। सः ऽवकीर्णी [illegible]ति। तस्यावकीर्णिनः
प्रायश्चित्तार्था गर्दभेज्या याऽगो भवति। वा विकल्पः। तेन गृह्योक्तमपि प्रायश्चित्तांतरं आज्या
हुतिद्वयरूपं विकल्पेन भवति। काम्यावकीर्णो स्मार्त्तपादिकं। अतएव रूपमेवाधानेनाहवनीयादीनु त ८३
त्पाद्यते ष्वेव तद्रूपं कर्तव्यमिति प्राप्तेमाह॥ लौकिके। एतौ स्थपतीष्टिः ऽवकीर्णिपशू लौकिकेग्नौ
भवतः। न ही माविष्टिपशू आधानं प्रयोजयतः॥ भूमौ पशुपुरोडाशश्रपणं। न तु कपालेषु॥
आज्यवदानहोमः। अवदानग्रहणाद् न्यदाघारावाज्यभागहोमादिकमन्यावेवकार्यं॥
शिष्टाप्राशित्रावदानं। गर्दभत्रिष्टात्। न जौहवेभ्यो हृदयादिभ्यः। अप्याग्निप्रस्तावादी
हवनीयाद्यग्निषु किं किं कर्म कर्तव्यमित्यपेक्षायामाह॥ वैतानिकेषु सर्वं ऽ सर्वार्थत्वात्। वैता
निका वितानार्हा विहारयोग्या गार्हपत्यादयः। तेषु वैतानिकेष्वग्निषु सर्वं कर्म श्रौतं हविश्रप
णहोमादिकं। स्मार्त्तं वैश्वदेवादिकं नित्यपाकप्रकाशादिकं भवति। कुतः सर्वार्थत्वात् सर्वार्था हि गार्ह
पत्यादयः। तस्माच्छ्रौतं स्मार्त्तं च नित्यपाकादिकं वैतानिकेषु भवति॥ इत्यष्टमी॥ इत्यपते वाद्यम

ग्रस्थस्त वे । होमापपन्निगआत्मापपिपन्यथन्निरुक्त अपासनेनसपराप्यानैकदेशेग्नौ सर्वातं
भवेत् ।८

त्र्योर्विदे । दक्षिणाग्निं प्रत्यक्षश्रूयते पाकादिकं मांसं तत्र न पचेयुरिति । अत एव प्रतिषेधात्प्रा
प्तिरनुमीयते । मांसपाको ह्यामित्रेग्नौ विहितः । स्मार्तमपि वैतानिकेषु कर्तव्यमिति
पूर्वः पक्षः । सिद्धांतमाह ॥ नौपासनश्रुतेः । यदुक्तं वैतानिकेषु श्रौतं स्मार्तं च कर्तव्यमिति
तं न । कुतः यतः आहिताग्नेरपि औपासनः श्रूयते पितृमेधे । तत्र गृहद्वारे राऔप
सनं निरस्यतीति । तथा च स्मृतिः । कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दाय
कालाहृते वापि श्रौतं वैतानिष्विति । गृहा यहितं गृह्यं । गृहशब्दश्च दंपत्योर्वर्तते ।
तस्मिन्नावसथ्ये । अतश्च याक्किंचिद्दंपत्योर्हितं कर्म शांतिकपौष्टिकव्रतां गहोमादिकं स्मा
र्तं तत्सर्वमावसथ्येग्नौ भवतीति । अत एवाह [illegible] । नस्थेवा[illegible]ग्नौ अन्यहोमः स्मा
र्तमुक्तैकांस मिदाहुतिं । स्वगर्न मक्षिया पांक्षियावन्नास्त्रोप्रजायते । तस्मात्स्मार्ता
नि औपासने एवकार्याणि । यद्येवं तर्हि मांसपाकप्रतिषेधस्य का गतिरित्यत आह ॥ अपि च अप ४

पार
नौ
१७

णी येमाऽ सप्रतिषेधः। यएष उक्तो मांसपाकप्रतिषेधो मांसं तत्र न पचेयुरिति सोऽधिश्र
यणीयेऽहनि द्रष्टव्यः। नवयज्ञे पशावासः क्रियते तदा तस्मिन्नेवाहनि तत्र दक्षिणाग्ने
राहरणं कार्यं। ना[illegible] वत्सप्रतिहोममिति विकल्पं वक्ष्यन्ति। न चावसिते त्वेनमौपियु हवनी द ३
रिति तदा च तस्मिन्नग्न्याहृते दक्षिणाग्नौ [illegible] विरोधे [illegible] जनार्हस्य नियतद्रव्यस्य
गे
पाको विहितस्ति। तस्मिन्पाचयुस्तद्धा [illegible] णाग्न्यपचेयुरिति। तत्र कदाचित्मांसस्य पतौ
तस्यापि पाकस्तत्र प्राप्नोति तस्यैव प्रतिषेधो मांसं तत्र न पचेयुरिति। अनेन नवयज्ञवा
स संबंधिमहः सदैवाऽधिश्रयणीयमहः दक्षिणाग्न्याहरणादिनं लक्ष्यते। अतः श्रौतान्येव
वैतानिके पुण्याहपत्यादिषु कर्तव्यानि। स्मार्तानि तु आवसथ्ये ग्नावेवेति सिद्धं। दक्षि
णाग्नावग्नौ करणाहोमोऽउक्तः। समसवधानपक्षेऽद्धधानपक्षे त्वावसथ्याग्नाविति॥

पतुरम्रतौर

१॥ यज्ञं व्याख्यास्यामः। तमेवाह॥ द्रव्यं देवता त्यागः॥ द्रव्यं पुरोडाशचरुसांनाय्यसो
मादिकं। देवता अग्निसोमेंद्रविष्ण्वादिशब्दमयी। तथा चोक्तं। तद्धितेन चतुर्थ्या वा मंत्रव
र्णेन चेष्यते। देवतासंगतिस्तत्र दुर्बलं तु परंपरं। तत्र तद्धितेन देवतासंगतिर्यथा। आ
ग्नेयोष्टाकपालः। चतुर्थ्या देवतासंगतिः यथा अग्नये नीकवते ष्टाकपालः। मंत्रवर्णेन
देवतासंगतिर्यथा उत्तराघारे। देवतोद्देशेन द्रव्यत्यागो यागः स एव प्रक्षेपाधिको हो
मः॥ तदंगमितरत्समभिव्याहारप्रकरणाभ्यां प्रधानभूताद्यागादन्यद्यदुद्धरणाग्न्य
न्वाधानप्रस्तरणम्॥ तच्छ्रहणादिकं तत्सर्वं तदंगं प्रधानयागस्य उपकारकं भवति।
समितियोग्यता सांनिधिमतां आकांक्षावतां पदानां व्याहार उच्चारणं समभि
व्याहारो वाक्यं। तस्माद्वाक्यात्प्रकरणाद्वेत्यर्थः। तत्र वाक्यस्य तावदुदाहरणं। ५

पौर्णमासेनेष्ट्वेंद्राय विमृधे नु निर्वपति। प्रकरणपाठाद्वैमृधस्योभयांगत्वे प्राप्ते वा
क्यात्पौर्णमासांगता भवति। अतः पदद्वयसमभिव्याहाराद्देव कल्प्यते प्रक
रणाचोभयाकांक्षा। तथाहि। दर्शपूर्णमासाभ्यां स्वर्गं साधयेकथंइत्येतस्य
माकांक्षायामविच्छिन्नायां चाश्रुतप्रयोजनानि अन्वाधानादीनि आम्ना
तस्पृष्टतानि तानि कर्माणि पठ्यंते। दर्शपूर्णमासयोश्चउपकारापेक्षा वर्तते। अन्वाधानादीनां क
पयपेक्षा वर्तते। एवंउभयोः आकांक्षावत्वे सति तत्संबंधप्रतिपादकं वाक्यं कल्प्यते अन्वाधानादिभिरु
पकृतेन यागेन स्वर्गं कुर्यादिति एवं। ततो वाक्याल्लिंगं अन्वाधानादिगतं सामर्थ्यं कल्प्यते। लिं
गाच्च विनियोजिका श्रुतिः कल्प्यते एभिः अंगैः प्रधानस्योपकारः कार्यः। देवतोद्देशपूर्वकद्रव्यत्या
गात्मकानां प्रयाजादियागानां पूर्वाघारादिहोमानां चानेनांगत्वं न सिद्ध्यतीत्यत आह॥ प्रजत

यस्याफलयुक्तास्तस्यांगं। अफलयुक्ताः यजतयः प्रयाजादियागाः वकारात्पूर्वाघारादिजुहोतयश्च
तदंगं। तस्य फलवतो यागस्य प्रधानस्य अंगं उपकारकाः भवंति। नात्र यागमात्रस्य फलसंबंधः। वं २
उच्यते किं तर्हि ये यागा दर्शपूर्णमाससंज्ञास्तेषामेव फलं॥ तद्यथा। आग्नेयोष्टाकपालः पौर्णमा
स्याममावास्यायां चाच्युतो भवतीत्याग्नेयस्य दर्शपूर्णमासस्संयोगेनोत्पत्तिः। तथाग्नीषोमीयं पौ
र्णमासे प्रायच्छत्। तथा ऐंद्रं दधि अमावास्यायामैंद्रं पयः ऐंद्राग्नो द्वादशकपालः एते हवींषि संबंधाद्दर्शपूर्णा
6 मासपदेन लक्ष्यंते। तेषामेव फलसंबंधः अनेन यागेन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत। अत एव
फलवंतः प्रधानभूताः इतरे प्रयाजादयो निःफलाः॥ यजतिजुहोतीनां को विशेषः। यजतीनां या
गानां जुहोतीनां होमानां परस्परं को विशेषः। तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरुनुवाकीतो
यजतयः। उपविष्टेन कर्त्रा होमो येषु ते उपविष्टहोमाः। स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः ६
तिष्ठता होमो येषु ते तिष्ठद्धोमाः। वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः। याज्यापुरोनुवाक्या विद्यंते येषु ते। इति

येऽस्मा उपविष्टहोमाः स्वाहाकारप्रदानाज्जुहोतयइत्युच्यंते। पूर्वंजाग्न्याधानादीनां प्रयाजादीनामंगत्वं मुक्तौ।
तान्यंगानि ऋत्विजं कुर्वंति। दर्शपूर्णमासाग्निष्टोमादिषु किंतु पूर्वोपिवर्णाः ऋत्विजो भवंति उत ब्रा(ह्मणा)
एवेति॥ ब्राह्मणा ऋत्विजो भक्षप्रतिषेधादितरयोः। अग्निहोत्रोपं प्रकृत्य श्रूयते। ते होचुः कोन
इदं होष्यतीति तद्वैनाऽब्राह्मणः पिबेत्। शाखांतरे न राजन्यो न वैश्यो वा सांनाय्यं पिबेत् सो
मपीपोह्येषः। सोमस्थाने पूतीका भवति॥ दर्शनाच्च। श्रुतावपि ऽयमप्येदृश्यते ब्राह्मणा एव
ऋत्विजः। तथा हि द्वयाविदेवादेवाः। स्वर्गकामस्य दर्शपेयइत्येवमादीनां फलयुक्तानां कर्मणामारंभे
किं कर्तुर्यथा पाकाम्यं उतावश्यं तेषां करणं॥ फलयुक्तानामारंभे यथा पाकामी फलार्थित्वात्।
काम्यानां कर्मणां द्वादशाहादीनामारंभे करणे कर्तुर्यथा पाकामी स्यात्। इच्छया प्रवृत्तिः स्या
त्। कुतः फलार्थित्वात्। फलमर्थ्यते यावते सः फलार्थी। फलार्थिनः फलं विधीयते। नान्य
स्य। एवं सर्वकर्मसु इच्छयानुष्ठानप्राप्ते माह॥ न नियमनिमित्ताग्निहोत्रदर्शपूर्णमासदाह्य।

यथाग्रयणपशुषुप्रवृत्तेः ॥ नियमः सत्यंवदेत् । निमित्तंकर्मविनाशादि । अग्निहोत्रंप्रा
तर्होमः । दर्शपूर्णमासौप्रकृतीष्टी । दाक्षायणोपि दर्शपूर्णमासविशेषएव । आग्रय
णंनवयज्ञः । पशुर्निरूढः । एषु नियमादिषु श्रुतेषु सत्स्वेतेषु कर्तुर्नयाप्याकामी ।
आरम्भात् नयाप्याकाम्यं । कुतः प्रवृत्तेः । शास्त्रंह्येतेषु नियमेनपुरुषं प्रवर्तयति । अतएषां
नियोगतोऽनुष्ठानंकर्तव्यं । तथाहि सत्यंवात्तिदे अधः शेतेवा । निमित्तेमतिर्नैमित्तं । अहद
हेग्नयेक्षामवतेष्टि । अग्निहोत्रेपिनयाप्याकाम्यं । यावज्जीवमग्निहोत्रंजुहुयात् । यावज्जीवंदर्श
पूर्णमासाभ्यांयजेत । आग्रयणेपिच । द्यावापृथिव्योः सस्यान्नस्यदेवेभ्योहोमानंतरंअशनं
विधीयते । पशावपिच । तंवैसंवत्सरेनानीजानमत्तीयादि । तथऋक्षुपशुप्रसुबंधयाजी । अतएवाह
वासिष्ठः । अवश्यंब्राह्मणोऽग्नीनादधीत दर्शपूर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्चयजेत ।

पाकहारितोपि। पाकयज्ञान्यजेन्नित्यं हविर्यज्ञांश्च नित्यशः। सोमांश्च विधिपूर्वेण यइच्छेद्धर्ममि-
व्ययं। तेच गौतमेन दर्शिताः। अष्टका पार्वणं श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजी चेति
सप्तपाकसंस्थाः। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढ-
पशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्याः। षोडशी वाज-
पेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः। पार्वणं पर्वणि क्रियमाणं स्थालीपाकलक्षणं। श्राद्धं
मासि मासि श्राद्धं। अग्निहोत्रं जुहुयादाद्यंते द्युनिशोः सदा। दर्शेन चार्द्धमासांते पूर्णमासेन तेन चै-
व हि। सस्यांते नवसस्येष्ट्या तथर्त्वंते द्विजोऽध्वरैः। पशुना त्वयनस्यांते सौमिकैर्मखैः। आ-
द्यंते द्युनिशोः सायंप्रातरित्यर्थः। अध्वरैश्चातुर्मास्यैः॥ सोमैर्वैके। अग्निष्टोमेन
याप्याकाम्यौ। वसंते वसंते ज्योतिष्टोमेन यजेत। एवं चातुर्मास्यादौ ज्ञेयं। अतः प्रयोजनेदृश्व।

अग्निहोत्रादिवत्। एकः स्वर्गकामप्रयोगः। अपरस्तु नित्यः। अत एव गवामयने कारणांत
रेण सोमानंतरायः श्रुतावुच्यते। कथमेषां सोमोनंतरितो भवतीति स वा निरितिब्रूया
तू। यदि सोमस्याऽवश्यकर्तव्यता न स्यात्तर्हि कारणांतरेणानंतरायवचनं न स्यात्। मनुः।
४ यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये। अधिकं वापि विद्येत स सोमं पातुमर्हति। एतत्काम्य
सोमयागविषयं। शंखः। त्रैवार्षिकाधिकान्नस्तु पिबेत्सोममतंद्रितः। इष्टिं त्वेष्वानरीं कु
र्यात्पैवाल्पधनो द्विजः। मनुः। पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेंद्रियः। नत्वल्पदक्षि
णैर्यज्ञैर्यजेतेह कथंचन। इंद्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजाः पशून्। हंत्यल्पदक्षिणो
यज्ञस्तस्मान्नाल्पधनो यजेत्। मत्स्यः। अन्नहीनो दहेद्राष्ट्रं। अन्नपरिमाणामपि शं
खेनोक्तं। सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ। चातुर्मास्येषु सर्वेषु शतं पर्व ८

ति पर्वणि। बौधायनः। यस्य नित्यानि लुप्तानि तथैवागन्तुकानि च। विप्रस्य हि न स्वर्गं
न गच्छेत्पतितो हि सः। तस्मात्कुर्याद्दिः फलैर्मूलैर्मधुना पयसापि वा। नित्यं नित्यानि
कुर्वीत न च नित्यानि लोपयेत्। तेनाल्पधनस्यापिग्न्याधाने सोमे चाधिकारः। कूर्म
पुराणे। नास्तिक्यादथवालस्याद्योऽग्निं नाधातुमिच्छति। यजेत वा न यज्ञेन स याति
नरकान्बहून्। याज्ञवल्क्योऽपि। प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा। कृती
वाग्रयणे। ष्टिश्च चातुर्मास्यानि चैव हि। एषामसंभवे कुर्यादिष्टिं वैश्वानरीं
द्विज इति। चातुर्मास्येषु चतुर्मुखवक्त्रतः। चातुर्मास्येषु च नयाण्याकामी। कुतः ऋतुमुखे ऋतुमु
खे चातुर्मास्येयज्ञेतेति वीप्साश्रवणात्। ऋतो मुखं प्रथमदिनं प्रतिपत् तच्चेत्पर्वः। गत
एवाचेष्पदेववरुणप्रघासादीनि चातुर्मास्यपर्वाणि प्रतिपद्येव क्रियंते न पौर्णमास्यां। तथा

वच्छ्रूयते। एषा ह संवत्सरस्य प्रथमा रात्रि यत्फाल्गुनी पौर्णमासी योत्तरेति॥ नियतसहपाठा
त्। नियतेर्नित्यैरग्निहोत्रादिकर्मभिः सहपाठादपि चातुर्मास्यान्यपि तद्वदवश्यं कर्तव्यानि
तेषु नयाप्याकाम्यं। तस्माद्धि। त एतान्यग्निकृतूंस्तेनिरग्निहोत्रं। दर्शनाच्च। गवामयने
उपाघांतरेष्वृतौ चातुर्मास्यानामनंतराप्यदर्शनाच्च चातुर्मास्ये नयाप्याकाम्यं तस्माद्धि।
कथमेषां चातुर्मास्यान्यनंतरितानि भवंतीति प्रश्ने यैतिब्रूयात्। सिद्धांतमुक्त्वा पूर्वपक्ष
माह॥ नोत्सर्गयोगात्। चातुर्मास्येषु नयाप्याकामी नियद्युक्तं तन्ने। कुत्सर्गयोगात्। यत
श्चातुर्मास्यानामुत्सर्गयोगोऽस्ति। इति निरूस्यजमानस्य। इत्येवं पूर्वपक्षितेऽनुक्तमेवासिद्धांतं
द्रढयति॥ स्यात्त्रिंशद्वत्। चातुर्मास्यानां नित्यत्वेपि उत्सर्गस्यात्। भवेत्। किंवत्। त्रि
ंशद्वत्। यथा दर्शपूर्णमासयोस्त्रिंशद्वर्षानंतरमुत्सर्गः तस्माद्धुत्रिंशतमेव वर्षाणि यजेत।
एवमपि [illegible]वनाद्युत्सर्गयोगोपि वैकल्पिको भविष्यति नित्यत्वंच। विगुणोफलनिर्वृत्तिरंगपक्ष।

नत्वेदात्। नित्येकर्मणि अग्निहोत्रदर्शपूर्णमासादिके वि[illegible]गुणोपि अंगहीनेपि कृते फलनिवृत्तिः। प्रत्य
वायपरिहाररूपस्य फलनिष्पत्तिर्भवत्येव। कुतः अंगप्रधानभेदात्। यतोंगानि प्रधानानि च
भिन्नानि॥ प्रायश्चित्तविधानाच्च। प्रायश्चित्तविधानादपि ओवं ज्ञायते तत् विगुणेपि फलनिर्वृत्तिर्भवतीति।
यदि च विगुणात् फलं न स्यात् तर्हि प्रायश्चित्तं न विदधीत॥ तथा च दृष्टं। नित्यं कर्मपि प्राकपं चित्प्रकृतां
गपरित्यागेनापि यथाशक्त्यंगोपेतमनुष्ठातव्यं चेन स्मृतौ दृष्टं। यत्पयो न स्यात् केनजुयाद् इति व्रीहि य
न्यैकमर्हति चिंत्यते। काम्येपि विगुणे फलनिष्पत्तिर्भवत्येव। यतस्तत्रापि अंगानि प्रधानानि भिन्ना
नि। अश्वमेधे च काम्ये प्रायश्चित्तविधानमपि अस्ति। अथातः प्रायश्चित्तीनां यद्यश्वो वडबा[illegible]
स्कंदेद्वायव्यं पयोनुनिर्वपेत्। यदि च विगुणादपि काम्यात् फलं न स्यात्तर्हि प्रायश्चित्तविधा
नं व्यर्थमेव स्यात्॥ तथा च दृष्टं। विगुणमपि काम्यं फलोत्पादकं वेदे दृष्टं। कारीरीमिष्टिं प्रकृ

त्यक्ष्यते। यदि वर्षेत्तावत्येव जुहुयात्। अतोऽत्रासमाप्तायामेव कारीर्यां तत्फलं वृष्टिस्वरूपं वेदे दृष्टं।
इति पूर्वपक्षिते सिद्धांतमाह॥ न श्रुतिलक्षणत्वात्। यदुक्तं विगुणेपि काम्ये फलं सिद्ध्यतीति
तन्न। कुतः श्रुतिलक्षणत्वात् काम्यस्य। यतः काम्यं सगुणमेव सर्वांगोपेतमेव श्रुत्या
लक्षितं फलसाधनत्वेन विहितं। तत्रांगलोपे काम्यमानफलानुपपत्तेः। तत्र प्रधानस्य त्या
गे यथा फलं नास्ति। एवमंगत्यागेपि। फलसाधनत्वं हि शास्त्रैकसमधिगम्यं। ततो य
दंगं प्रधानं वा यावद्वचोपात्तं। तस्य लोपे साधनत्वं नास्ति। अतो यदा सर्वांगोपेतं कर्तुं
न शक्नोति तदैव तत्र प्रवर्तते॥ प्रायश्चित्तं तदा। आरब्धं हि काम्यं अयथाकरणा
५ रि दिना विगुणमपि असमापने विशेषविगर्हणारूपात्क्लिष्टाचारात्स्मृतिस्मृतेश्च श्रु
तिकल्पयित्वाग् अवश्यं समापनीयमेव। विगुणाद्यद्यपि श्रुतं फलं न भवति तथापि
तादृशात्प्रत्यवायपरिहारो भवत्येव। विगुणायामपि असमाप्तायां कारीर्यां वृष्टिरूपफल
२१ दर्शनस्य का गतिरित्याशंक्याह॥ दृष्टे तत्परिमाणं। कृतार्द्धायामिष्टौ वर्षति वृष्टे सति १०
तत्परिमाणमेव कर्तव्यं कर्म। यत्परिमाणमदृष्टे वर्षति क्रियते। ननु वाप्तो दृष्टायां किमपि

ऊनं कृताङ्गं वा परित्याज्यमिति। अधुना लिंगेन मंत्राणां विनियोगं वक्तुकामोऽध्येतृप्रसिद्धां
स्तान्मंत्रानाह॥ ऋचो यजूंषि सामानि निगदा मंत्राः। यत्र नियताक्षराणि नियतावसानपा
दाः नियतानि वावसानानि सा ऋगित्युच्यते। अनियताक्षरपादावसानं यजुः। प्रगीतं मंत्रवा
क्यं साम। गीतिरेव साम। निगदाः प्रैषाः परसंबोधनार्थाः प्रोक्षणीरासादयाग्नीदग्नीन्विहर
रेत्येवमादयः। निगदा अपि यजूंष्येव। उपांशु यजुषा क्रियते। उच्चैर्निगदेनेति। ऋक्सामयोर
पि कृविदुपांशुप्रयोगविधानात्। यजुषां उप्राश्लिष्टपठितत्वाच्छेदकानां विना भेदो न ज्ञायत इत्यत
आह॥ तेषां वाक्यं निराकांक्षं। न तावत्सर्वेषां ब्राह्मणो न विनियोगोऽस्ति। न च परादिनापूर्वं वेति इत्येत
च्छेदकानां वेदवचनं। न्यायेन सूत्रकृता इदं उक्तं। अतो लक्षणमुच्यते। तेषां यजुषां प्राश्लिष्टपठितानां
मध्ये यावत्पदवृंदं निराकांक्षं पूर्वापरपठितपदांतराकांक्षारहितं तावत्पदसमूहात्मकं एकवा
क्यं। इषीहत्वा एकं यजुः। तेन यावता पदसमूहेन यागसाधनं समाप्यते। तावद्यजुर्वाक्यं। तावद्वेका
र्थं साकांक्षावयवं वा। तद्यथा। देवस्य त्वा सवितुः प्रसव इति। अत्र सर्वाणि पदानि ग्रहणप

काशनार्थानि अत एकानि साकांक्षाणि वा तस्मात्पदेष्वामेकं यजुष्ट्वं एवं सर्वत्र पुरस्ता
त्परस्ताच्चैकार्थपदपरिग्रहेणा समर्थपदविमोकेन भिन्नानि यजूंषि कल्प्यंते॥
मिथः संबद्धं। यावदेव मिथः संबद्धं। परस्परसंबद्धं अन्वययुक्तं मिथो वेत्येतावत्ताव
देकं यजुः एकं वाक्यं। पूर्वमंत्रे परमंत्रे वा पठितो वाक्यशेषः मंत्रांतरेणापि संबध्यते स
एवानुषंगः तद्यथा। अस्मादन्नादस्यै प्रतिष्ठायाइत्यादौ पूर्वमंत्रानंतरपठितः नि
र्नक्तो यो अस्मां द्वेष्टीत्यादिः वाक्यशेषः स एवानुषंगः। अध्याहारो लौकिकः। अनुषं
गस्तु वैदिकः। प्रयोजनं एतच्चिंतायाः। अध्याहारविनाशे स्मार्तं प्रायश्चित्तं। अनुषं
गविनाशे श्रौतमिति। दर्शपूर्णमासयोरिषे त्वेत्यत्र छिनद्मीत्यध्याहारः। ऊ
र्जे त्वेत्यत्र संनमयामीति अध्याहारः। तेषामार्षाद्यप्रतीतौ व्यवस्था तद्वचनवात्। तेषां मं
त्राणां आरंभे प्रयोगे अपि तः विहितार्थाभिधानरूपेणासामर्थ्येन लिंगेन
अनेन मंत्रेणायं पदार्थः कर्तव्यः अनेनायं इत्येवं रूपा व्यवस्था भवति। यो मंत्रो

यत्पदार्थाभिधानसमर्थः स तत्र विनियुज्यत इत्यर्थः। कुतस्तद्वचनत्वात्। तमेवार्थं वक्तीति त
द्वचनः। नार्थांतरं। यथा उरु प्रथा उरु प्रथस्वेति मंत्रं [illegible] प्रथनमेवाभिधातुं समर्थः॥ मंत्रां
तेः कर्मादिः सांनित्यो[illegible]भिधानात्। कर्मसु ये मंत्राः पठ्यंते। तेषां मंत्राणां अंतेः सह कर्मा
दि क्रियमाणस्य कर्मणः आदिः सांनिपात्यः संयोजनीयः। कुतः अभिधानात्। यतो मंत्रः
पठित एव सन् कर्माभिदधातीति वक्ति। नान्यथा॥ अनियमं वाक्यः। वास्य आचार्यः मंत्रप्र
योगस्य कालानियमं अब्रवीति प्र[illegible]र्थं क्रियमाणो वा कृते वा कर्मणि मंत्रः पठितव्य इति। सि
द्धांतमाह॥ आदिं वाचार्याः। तुशब्दो वास्य मतनिरासार्थः। सर्वेपि मुनयः कर्मणः आ
दिमेव मंत्रांतेः संयोजयतीति नियमः। मंत्रैरेव स्मृतं कर्म कृतं वाभ्युदयकारि भवति
इत्यवधारयति। यत्र च मंत्रा नावस्तत्र विधिवाक्येनैव। तदसंभवे उपायांतरेणापि पदार्थ
स्मृतिः कार्या॥ तस्मात् युक्ताः। ते मंत्राः सूत्रमध्ये आयुक्ताः आदिमात्रेणोक्ताः संतः प्र

योगकालेसकलाःप्रयोज्याः॥ परादिनापूर्ववितः।परस्यमंत्रस्यसूत्रोपात्तेनादिना
विद्धनूतेनपूर्वस्यमन्त्रस्यांतोऽनुषः।नन्वेतन्नवक्तव्यं।किंतुह्कविद्वाक्यसमूहस्यै
कमंत्रत्वसिद्ध्यर्थंपुनरुच्यतइत्यदोषः।तद्यथा।विश्वेषांत्वादेवानांभागधेयीस्थे
तिसमाप्तेगमनूयडुपस्थेयेइत्यादिप्रयुज्यते।यथावाष्टगृह्णीतंजुहोतिसंततमुद्भू
न्युंजानइत्यष्टानामेकमंत्रत्वं।वित्यंगकं तिपंचदिशइत्यादौच॥ उपांशुप्रयोगश्रु
12 तेः।तेषांयजुषांयजुर्वेदमंत्राणांकर्मसुउपांशुप्रयोगोभवति।कुतःश्रुतेः।उच्चैर्ऋचा
क्रियतेउच्चैःसाम्नोपांशुयजुषेतिशाखांतरेश्रवणात्।स्वशाखायामपिसयउपां
शुयजुर्भिश्चरति।अस्यसूत्रस्यपशुसोमव्यतिरिक्तं कर्माग्निहोत्रादिकंविषयः॥ १२
नसंप्रेषाः।संप्रेषानिगदाः प्रोक्षणीरासादयाग्नीदग्नीन्विहरेत्येवमादयः।उपांशु

नप्रयोज्याः ॥ कौशं बर्हिः । बर्हिः कौशं । कुशा दर्भाः तस्येदं कौशं । कुशकाशशरोदूर्वायवगो
धूमबल्बजाः । सुवर्णरजतं ताम्रं दश दर्भाः प्रकीर्तिताः ॥१ आप्यायितपरिमाणं । अग्न्यगारादौ
वसोर्धारा होमे स्रुवः स्रुवस्यैव आप्यायितपरिमाणं भवति । यावता परिमाणेनार्थः प्रयो
जनं सिध्यति तावत्परिमाणं भवतीत्यर्थः । प्रयोगाद्बहिरेव पुष्टेष्टि वद्राजयक्ष्म इत्यत आ
रभ्य वेद्याहेत्येतत्पर्यन्तं पठता कस्मिंश्चित्पात्रे संततं घृतं स्रुक्चुनालिकया निनीयत
स्याज्यस्य तोलनाद्युपायेन परिमाणं निश्चित्य तावदाज्यं यत्परिमाणा या स्रुग्विमा
तिता वा तत्प्रमाणां तां स्रुवं कुर्यात् । तस्याज्यस्य पञ्चमभागसंग्राहकश्च स्रुवश्च कार्यः ।
एवं यदा षडंशप्रत्याम्नाये पावके पि तिष्ठानरेष्ट्यादिकं क्रियते । तदापि वेदैः पञ्चाङ्गगोऽ
र्याप्तावपरिमाणो विपुलः कार्यो यावति भवरोक्तमुत्तरं हवीषीति न्यायेन सर्वेषामु
दरसंस्थमास्मादनं संभवति । तदनुसारेण प्राचीप्रमाणं पुरस्तात् तिर्यक्प्रमाणं च पा दा

नंकल्प्यते। तदुक्तं शातपथे। यावतीमेव स्वयं मनसा मन्येत तावतीं कुर्यात्॥ अयु

ग्धातूनि यूनानि। धातवः संख्यायुक्ति प्रक्षेपाः। अयुजो विषमा एक त्रिनवादि विषमसं

ख्या धातवो येषां तानि अयुग्धातूनि॥ प्रागग्रेषु उदगग्रं बर्हिराविनोति। प्रागग्रेषु

निस्तंनहनेषु उदगग्रं बर्हिः बंधनार्थं स्थापयति॥ उदगग्रे प्रागग्रमिध्मं। उदगग्रे संन

हने प्रागग्रमिध्मं स्थापयति॥ प्रत्यग्रं पवीनवगूहति। पूर्वाग्रं पवीनूर्ध्वप्रत्यगवगूहति।

प्रेरयति॥ अष्टादशेध्मं परिधिवर्ज्जाणां। परिधिसंबंधिनो वर्ज्जाः पालाशा विकंकतादयः। परिधि

वर्ज्जाः। तेषां परिधिवर्ज्जाणां संबंधिनमष्टादशसंख्याकाष्ठकमिध्मं कुर्यात्॥ एकविंशा

तिं वा। अथवा एकविंशति संख्यकाष्ठकमिध्मं कुर्यात्॥ ततः परिधीनेके। एके आचार्याः ततएकविं

शतिकाष्ठकादिध्मात् त्रीणि काष्ठान्यरत्निमात्राण्येवोपादाय परिधीन्परिदधति। तद्वैकएधस्यैवैतान्प

रिधीन्परदधतीति श्रुतेः। अथवैकमेवेदं सूत्रं॥ एकविंशतिं वा ततः परिधीनेके। एके आचार्याः तस्मा 13

द्विवेकविंशतिकाष्ठकेध्मात्परिधीन्परिदधति। एतदेवयुक्ततरं। हरिस्वामिनः। तदुक्तप्पानकुर्यादिनवक्त्रेप्राह
तस्यैतेभवंति। बाहुमात्रेः परिधिभिः शाद्रैश्चभवितव्यं। इध्मस्तुपुष्पइंधनञ्चादेव द्विप्रादेशस्य। अपरिमि
तं प्रणयनीयं त्रियूनं। प्रणयनस्याग्नेःप्रणयनीयः। तं प्रणयनीयं। अग्निप्रणायनार्थमिध्ममपरिमितं अपरितका
ष्ठकं त्रिभिः संनहरज्जुभिर्बद्धं कुर्यात्॥ त्रीणि यूनानि यस्त्रियूनः। अपरिमितं चप्रागुक्तो ध्मकाष्ठसंख्यापेक्ष
याऽतिशेनाधिकसंख्यकाष्ठकत्वं। तेनचतुर्विंशतिसामिधेनीकेयइष्टकापक्षुस्तत्रसप्तविंशतिः काष्ठानि भ
वंति। ततश्चप्रणयनीयेततोप्यधिकानिअष्टाविंशतिप्रभृतीनि द्वित्रासंख्यानिकाष्ठानिभवंति॥ निरूप्याज्यं वेदो
सीतियजमानोवेदंकरोति। यजमानः आज्यनिर्वापं आज्यसंस्कारात्पूर्वावेदोसीत्यनेनमंत्रेणवेदंकरोति। अस्यमंत्रस्या
नेकयजमानकेऊहोभवति। तेनवाभ्यांवेदोभूयाइतिद्वियजमानके। तेनास्मभ्यंवेदोभूयाइतिबहुयजमाके। द्वे
विरभ्योवेदोभवेतिपिञ्चायां। कीदृशंवेदमित्यपेक्षायामाह॥ कुशमुष्टिं सव्यावृत्तंवत्सजानुं निवृत्तंमूलका
र्यंवापशुब्रह्मवर्चसान्नाद्यकामायथासंख्यंयथासंख्यंयथोपदेशकामेष्वेवमाकारं वेदं कुर्युः। तत्र
पशुकामः कुशमुष्टिं सव्यावृत्तंप्रदक्षिणावृत्तंवत्सजानुंवेदंकरोति। अस्यनिर्माणप्रकारः कठमैत्रसूत्रादि

विलोकनीयः। ब्रह्मचर्यसकामः कुशमुष्टिं त्रिवृतं करोति। अन्नाद्यकामो मूतकार्यमिति। वत्सजानुरिति वत्सजानुस
दृशः। त्रिवृत् त्रिगुणः। मौञ्जं त्रिवृद्कुर्व्यां। त्रिवृतं परिव्ययतीत्यादौ तथैव दर्शनात्। मेखलायां वारिणीं त्रिवृतमि
ति पृष्ठाग्निर्देशात् त्रिवृच्छब्देन वेण्याकारता यत्कैश्चिदुक्ता तत्केनाऽभिप्रायेणेति त एव विदुः। मूतो धान्यावा पर
प पात्रं शरावमित्यादिनिर्मितं तद्वा क्रियते। वेदस्य प्रमाणं परिशिष्टे उक्तं। वेदं समित्पवित्रं वत्रपप्रादेश सं
मिति॥ आमुष्मादिति कर्मसु तच्च। कर्मसु पष्ठ्यादिषु पत्रपत्रआ आमुष्मादित्येव माऽऽप्रयोगः क्रियते
14 तद्यथा। आप्रयाजेभ्यः आइडायाः आवैश्वदेवादिति तत्रतच्च। वाप्यर्थे। तदपि कर्मकर्तव्यं। सर्वत्राऽङ् आ
निविध्यर्थे ज्ञेयः। कर्मसु आ अमुष्मादित्युक्ते तच्च तदपि कर्मकर्तव्यं॥ अंतवचनेच। शंयोरंतं च व
तिइडांतं च वतीत्येवमादौ अंतवचने चकारात्तच्चेति। पूर्वस्माच्चात् अनुकृष्यते। तदपि अंतस्तु युक्तं
शंय्विडादिकं कर्तव्यं॥ प्रतिकर्मेऽद्विरणमप्रसंगे। प्रतिकर्मकर्मकमप्रीति सर्वेषु कर्मसु पृषपकृपृपकृ आहवनीय
दक्षिणाग्न्योर्गार्हपत्यादुद्धरणं कर्तव्यं अप्रसंगे सति। अन्यापि अनुष्ठितस्य अन्येन उपजीवनं प्रसंगः। १४

नप्रसंगः अप्रसंगः तस्मिंनिति। तेनयदिदर्शपूर्णमासपश्वाद्यपर्युद्धृतो अनपवृत्तस्येते नित्यकर्मकाले।
तदा तत्कर्माद्यं पुनः पृथगुद्धरणं न क्रियते। तयोरेव तदपि नियतकालीनं कर्म क्रियते। यथा अग्नि
होत्रमागतोपस्थानादिकं च। पुनराधानानंतरं धारणोक्ते तद्विरूपात तदिष्टि पशुचातुर्मास्यादिकं च।।
अपवृत्तकर्मा लौकिकोऽर्थसंयोगात्। अपवृत्तं समाप्तं कर्म यस्मिन् सोऽपवृत्तकर्मा आहवनीयो लौकि
को भवति। वैदिकमाहवनीयं वंसंस्काररूपं ततोऽपगच्छतीत्यर्थः। कुतः अर्थसंयोगात्। यदप्युद्धृत
तस्य तेनार्थेन प्रयोजनेन संयोगात्। तेन यत्कर्माप्यमुद्धृतस्त■समाप्त्यनंतरं लौकिकोज्ञेयः। अत
था पौर्णमास्यादौ यदिबह्वयः इष्टयः पृथक्तंत्राः क्रियंते। तदा प्रतीष्टि पृथक्पृथगेवोद्धरणं कार्यं न स
कृदुद्धृत एव सर्वासामनुष्ठानमिति।। अप्रकरणोत्पत्तिरनारभ्यवादत्वात् अयि वा सर्वगुणाः। न वि
कर द्यते यस्य चित्कर्मणः प्रकरणे उत्पत्तिर्यस्य सोऽप्रकरणोत्पत्तिः। किं विककर्मारभ्योपक्रम्य उच्यत इत्यार
भ्यवादः। नारभ्यवादोऽनारभ्यवादः। यस्य पर्णमयी जुहूर्भवतीत्यादिरनारभ्यवादो भवतीत्यादियोविधिः क

स्य विकर्मणः प्रकरणे पठितो न भवति। आमुष्मिकर्माणि खादिरः स्रुवो भवतीत्येवंविधः यस्य प्रकरणे
न वाक्येन चांगत्वं न भवति। स एवंविधः पालाशमयी चरु खादिरत्वादि विधिः सर्वगुणो भवति प्रकृते विकृते च
साधारण एवोपदिष्टो भवति। कुतः। आश्रयित्वात्। आश्रयोऽस्यास्तीत्याश्रयी तस्य भावस्तत्वं तस्मात्।
स्रुवजुह्वोश्च प्रकृतिविकृत्योर्विद्यमानत्वादेवंविधोऽनारभ्यवादः सर्वगुणः प्रकृतिविकृत्योरुभ
योरपि अंगमिति प्राप्ते सिद्धांतमाह॥ प्रकरणे त्वाविशेषात्। वकारोऽवधारणे। प्रक्रियंतेऽस्मिन्धर्मा
इति प्रकरणं प्रकृतिः। अप्रकरणोत्पत्तिरनारभ्यवादरूपो विधिः प्रकरण एव कृतौ एव निविशते। नोभ
15 यत्र प्रकृतौ विकृतौ चेति। कुतः। अविशेषात्। यतश्चोदकः प्रकृतितः सर्वमंगजातं प्रकरणपठितं अ
नारभ्यवादप्रज्ञापितं वा विशेषेण विकृतौ प्रापयति। तथाहि। किमयं विधिर्विकृतौ चोदकात्पूर्वं निवि
शते पश्चाद्वा। नाद्यः। आश्रयभूतयोः स्रुवजुह्वोश्चोदकमंतरेणासंभवात्। दर्शनाद्य। विकृतेष्प्रय १५

तोनेन विधिना अप्रभूतस्रुवजुहूत्वानापत्ते विकृतौ चोदकप्रवृत्तिः प्रतीक्षणीया पश्चादयं विधिर्निविशत इति द्वितीयपक्षे पालाशखादिरत्वं जुहूस्रुवेणावसादेव चोदके
दिरयते। तत्र चोदकेन प्रापिते सति यद्यनारभ्यवादविधिः पुनः प्रापयेत् [illegible] त्वात्। अतश्चोदकेन प्रापितत्वात्पुनर्विधेः वैयर्थ्यादनारभ्य
ः प्रकृतावेव निवेश इति सिद्धांतः। ६॥१

याजादीनां प्राकृतानां धर्माणां दर्शनाप्येवं ज्ञायते यदनारभ्यवादविकृतौ चोदकात्पूर्वं न निविशंत इति। यदि पूर्वं निविशेयुस्तदा
विकृतं प्रधानमनारभ्यविधानेव पू[illegible]रितकथंभावं सन्निराकांक्षत्वात्प्राकृतान्यंगानि न गृह्णीयात्। तदा च विकृ
तौ प्रयाजादीनां प्राकृतानां दर्शनं न स्यात्। अस्ति चात्र पाठः। अश्वमेधेऽप्यसावित्रीमिष्टिं निर्वपति। प्रकृत्य
तस्यै प्रयाजेषु तायमानेष्विति अत्र प्रयाजानां विधिपरे वाक्ये प्राकृतान्प्रयाजान्दर्शयति। तस्मादनारभ्यवा
दाः प्रकृतावेव निविशंत इति सिद्धं॥ वैकंकतानि पात्राणि। यज्ञपात्राणि सर्वाणि वैकंकतानि विकंकतवृक्ष
काष्ठघटितानि भवंति। ततो विकंकतः समभवत्तस्मादेष यज्ञियो यज्ञपात्रीयो वृक्ष इति श्रवणात्। सामान्यसू
त्रमेतत्। अस्यापवादमाह॥ खादिरः स्रुवः। स्रुवः खादिरः स्यात्॥ स्फ्यश्च। वकारात् स्फ्योऽपि खादिरः स्यात्
खादिरः स्फ्य इति श्रुतेः॥ पालाशी जुहूः। हूयतेऽनयेति जुहूः स्रुक् सा च पालाशी स्यात्। यस्य पर्णमयी जुहूर्भवति
न स पापं श्लोकं शृणोतीति श्रुतेः॥ आश्वत्थ्युपभृत्। उपभृत्संज्ञिका स्रुक् आश्वत्थी। ध्रुवा तु वैकंकती भवति।
वैकंकतानि पात्राणीत्यनेनैव अपवादाभावात्। होमसाधनत्वाच्च। तया हि समिष्टयजुर्हूयते। तिष्ठन्ध्रुवया समिष्टय

गुर्जुहोतीति शाखांतरश्रुतेः॥ वारणान्यहोमसंयुक्तानि । यैर्होमः क्रियते तानि होमसंयुक्तानि । यैर्होमसं
युक्तानि यैर्होमो न क्रियते तानि वारणानि भवंतीत्यर्थः । तत्र वारणान्युदाह्रियंते । उलूखलमुसलकूर्चे
डापात्रीपुरोडाशपात्रीशम्याः । एतावदानान्युपवेषांतर्द्धनिकटप्राशित्रहरणषडवत्तब्रह्मयजमानासन
होतृषदनादीनि । तत्रोलूखलमुसलयोर्विशेषः । मुसलोलूखलवार्क्षे स्वायते सुदृढे तथा इच्छाप्रमाणे भव
तः शूर्पं वैणवमेव चेति । तथा खादिरं मुसलं कार्यं पालाशः स्यादुलूखलः । यद्वोभौ वारणौ कार्यौ । तदभावे ऽन्यवृ
क्षजाविति । कूर्चो बाहुमात्रः पीठाकारः । इडापात्री अरत्निमात्री मध्यसंगृहीता । तथैव द्वितीयाह विद्धारिणपा
त्री अति विपुला । पिष्टपात्रीति सैवोच्यते । पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा अपर्यात्यडंगुलपरिमितपरि
मण्डलावती । लोकात् शेषस्य प्रतिपत्तिरिति कठसूत्रात् । प्रादेशमात्रं तीक्ष्णांगुष्ठपर्वमात्रपृथुमुखं । एतावदानं
अरत्निररत्निमात्रस्तीक्ष्णमुखः । उपवेषो ऽरत्निमात्रः प्रादेशमात्रो वा हस्ताकृतिः । अंतर्द्धानकटस्त्वर्द्धचंद्राका
रो द्वादशांगुलः । प्राशित्रहरणस्याकारं वक्ष्यति । षडवत्तं चो नयत्रवातवत् । आसनानि वारणि
मात्राणि प्रादेशमात्रमात्राणि वा प्रादेशमात्राणि पृथूनि । सर्वेषु पात्रेषु मूलान्निज्ञोपकानिवं तानि कार्याणि १६

री। एतान्यहोमसंयुक्तत्वाद्धारणानि॥ अथ वैकंकतान्युच्यंते। ध्रुवाऽग्निहोत्रहोमार्थस्तु स्रुवः। सोमयागे ग्रह
चमसद्रोणकलशादीनि च। तथापि हविर्द्धानोऽधिषवणफलकपरिप्लवसंनरण्यादीन्यहोमसंयुक्तानि वारणान्ये
वा षोडशिपात्रं खादिरं। सप्तदस्तु राग्रहाणां पात्राणि वारणानि। आवसथ्यपात्राणि अहोमसंयुक्तानि वारणान्ये
वा प्रणीताप्रोक्षणीपात्रदर्वीकं कतादीनि। यज्ञपार्श्वे। चमसानां तु वक्ष्यामि दंडा[illegible]स्तु स्वचतुरंगुलाः। त्र्यंगुलस्तु न
वेस्कंधो विस्तारश्चतुरंगुलः। विकंकतमयाः सद्भास्त्वच्छिलाश्चमसाः स्मृताः। अन्ये त्वाथावाशि
कायस्तेषां दंडेषु लक्षणं॥ होतुर्मंडल एव स्याद्ब्रह्मणश्चतुरस्रकः। उद्गातृणां त्र्यस्रिः स्याद्यज
मानस्य स्मृतः॥ प्रशास्तुरवतष्टः स्यादुन्नष्टो ब्राह्मणशंसिनः। पोतुरस्ये विशाखी स्यान्नेष्टुः स्याद्विग्र
हीतकः॥ अच्छावाकस्य रास्नाच आग्नीध्रस्य मयूरवकः। इत्येते चमसाः प्रोक्ता रुत्विजां यज्ञकर्मणि॥ २
पालाशाद्वा वटाद्वाऽन्यवृक्षाद्वा चमसाः स्मृताः॥ इति स्मृत्यर्थसारे। सम्मत्वपवित्रं वेदं च मुसलोलूखलग्रहान्। नान्यु
खासंदीउपरवान् शम्यास्तु कूपुष्करा शिवा। शासस्वरु विषाणानि चरूणां मेक्षणानि च। कुर्यात् खादेशमात्रा
णि। महावीरस्त्रयस्तप्या। द्रोणकलशाऽधिषवणफलके स्रुग्दंडपरिधिस्तूनानि स्फ्यस्तूपेपि वेधे घावपिप्र

णयनीयावधिवपात्रपण्यो कुर्यादरत्निमात्राणीति॥ बाहुमात्र्यः स्रुवः पाणिमात्रपुष्करास्त्वग्बिलाहंससमु
खप्रसेका मूलदंडा भवंति। पाणिः प्रमाणमस्य तत्पाणिमात्रं। पाणिमात्रं पुष्करं मुखं यासां ताः स्रुवः भवंति। त्वचि
त्वक्प्रदेशे बिलं मुखं यासां तास्त्वग्बिलाः। हंससमुखसदृशः प्रसेकः प्रणालिका यासां ताः हंससमुखप्रसेकाः। मूले
दंडो यासां ता मूलदंडाः॥ अरत्निमात्रः स्रुवोंऽगुष्ठपर्ववृत्तपुष्करः। स्रुवोऽरत्निमात्रो भवति। अंगुष्ठपर्वणो वृत्तमंगु
ष्ठपर्ववृत्तं। अंगुष्ठपर्वप्रमाणं वृत्तं वर्तुलं पुष्करं मुखं यस्या सो अंगुष्ठपर्ववृत्तपुष्करः। पर्वशब्दः संधिवाची॥
17 पर्वग्रं पिप्रमाणं चतुरस्रं रुचात्तदेव चतुरस्रं मंडलं विकीर्षन्तित्युपायेन वृत्तं विधाय तत्प्रमाणं स्रुवस्य पुष्करं ना
सिका वज्रवातं वस्यात्॥ स्फ्योऽस्याकृतिः। असिः खड्गः। असेरिव आकृतिर्यस्या सा वस्याकृतिः। स्फ्यो वज्रः॥
आदर्शाकृतिः प्राशित्रहरणी। आदर्शो दर्पणः तस्याकृतिराकारो यस्य तत् आदर्शाकृति। आदर्शसदृ
शं वर्तुलं तच्चावदानविधानाच्च स्यात वत् प्राशित्रहरणं भवति॥ चमसाकृतिर्वा। चमसस्येवाकृतिर्यस्मा
त् चमसाकृति। वा विकल्पे॥ बाबालोकस्सावंतरेणासंवरः। संवरंत्यनेनेति संवरः गमनागमनमार्गः॥ १७

वात्वालोत्करौ। तयोरंतरालेन सर्वेषां विहितकार्यापि संवरः। अपवसो तरवेदिकेषु वरूणप्रघासमहाहविः
पष्ठुसोमेषुज्ञेयः॥ प्रणीतोत्करा विष्टिषु। अंतरे संवर इत्यनुवर्तते। इष्टिषु दर्शपूर्णमासादिषु प्रणीतोत्कर
वंतरेणागमनागमनापि संवरः॥ ३ चोदिताभावेनारंभस्तत्सिद्धित्वात्तस्य। चोदितस्य विहितस्य षुतस्य
व्रीहियवादेर्मुख्य द्रव्यस्याभावे अलाभे अप्राप्तौ सत्यां काम्यस्य कर्मणः अनारंभो ऽप्रयोग
एव भवति। कुतः। तत्सिद्धित्वात्। तेनैव सिद्धिः परस्य तत्सिद्धिः। तेनैव द्रव्येण सिध्यति नान्येन॥
नियते सामान्यतः प्रतिनिधिः स्यात्। यथाशक्तिप्रयोगस्यस्थापितत्वात् नियते नित्ये कर्मणि दर्शपूर्णमासा
दौ अस्तु तद्द्रव्याभावे सामान्यतः मुख्यद्रव्यसादृश्यात् प्रतिनिधिर्भवति पुत तद्द्रव्यसदृशो न द्रव्यांतरेणापि
नित्यं कर्मारंभणीयं॥ आरंभान्नियमः। काम्येपि आरंभादूर्द्ध्वं समाप्तेर्नियमो ऽवश्यंभावः। आरंभादिति
हेतौ पंचमी। तेनारंभ एव समाप्तेः कारणं। यत आरब्धं ततो ऽवश्यं समापनीयमेव। समाप्तिश्च मुख्याभा
वे प्रतिनिधिउपादानं विना न भवति॥ दोषश्चासमाप्तौ स्यात् सामान्यात्। किंवा प्रारब्धस्य काम्यस्यासम
सावसमापने दोषः स्यात्। कुतः सामान्यात्। आरब्धस्य काम्यस्यावश्यकर्तव्यतया नित्येन समानत्वात्॥

दर्शनाच्च। श्रुतौ मुख्यद्रव्यस्याभावे द्रव्यांतरेणापि परिसमाप्तिदर्शनाद्धेवमवसीयते यन्मुख्यद्रव्यस्या
भावे द्रव्यांतरं प्रतिनिधेयमिति। तद्यथा। यदि सोमं न विंदेत्पूतीकानभिषुणुयादिति॥ अन्यार्थं दर्शनं
न पुनर्ग्रहणात्। अन्यार्थं सत् दर्शनं भवति। तद्धि दर्शनं कथ्यते। यदन्यविधिपरं सत्प्रसंगादन्यमर्थं सिद्धं ज्ञा
पयति। यथा तस्ये प्रयाजेषु तायमाने पुष्णाद्वाज्ञाणावीणागापीदृद्दिणा· आपाणायतीत्यं तंवाक्यं गापाणानविधि
परं सद्दस्यामिष्टेप्रयाजाऽन्वाने दर्शयति। यदि सोमं न विंदेदित्यादि तादृशं दर्शनं न भवति। कुतः।
पुनर्ग्रहणात्। सोमाभावे मतिपुनर्द्रव्यांतरस्य पूतीकलक्षणस्यऽप्राप्तस्य ग्रहणात् विधानात्। अथ सिद्धांतमाह॥
अन्यार्थं पुनर्ग्रहणं। पूतीकानभिषुणुयादित्येतत्पुनर्ग्रहणमेवान्यार्थं। पूतीका प्रतिनिधिनियमार्थमित्यर्थः।
ननु अप्राप्तानां पूतीकानां विधानार्थं। सोमाभावे सुसदृशेष्वसदृशेष्वपि प्राप्तेषु पूतीका नियम्यते। विचारस्यै
तत्प्रयोजनं। प्रतिनिधिनियमपक्षे पूतीकविनाशे सोमसदृशस्योपादानं। कर्मतः मुख्यद्रव्याभावे द्रव्यांतरेणा
परिसमाप्तेर्दर्शनं भवत्येवेति सिद्धं॥ अथेदं विचार्यते। सोमे पयोव्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्ये
त्यस्मिन् व्रते किं प्रतिनिधिर्भवत्युत न भवतीति। तत्र पूर्वपक्षमाह॥ व्रते प्रसंगो न नियमशास्त्रात्। व्रते पयोव १८

तादौ प्रतिनिधेः प्रसंगो न भवति। कुतः। नियमशब्दात्। नियमप्रतिपादकः शब्दो नियमशब्दः। एव
कारः। सोत्र श्रूयते। अतः ऽश्लेवास्यातो शानं भवतीति। एवकारेण प्रतिनिधिरेव निवार्यते। अन्यस्य
निवारणीयस्याभावात्। एवं पूर्वपक्षितेइदमेव सूत्रं सिद्धांतपरतया पि व्याख्यायते। अतेपि प्र
तिनिधेः प्रसंगो भवति। प्रतिनिधिर्भवत्येव। कुतः। ननियमशब्दात्। यतो नायं नियमशब्दः। नह्ययं नि
यमं प्रतिपादयितुं शक्तः। यतो ऽयमिष्टाशानस्तुत्यर्थः। पुराके शरमश्रोवपनाद्यकामयेतत
दश्नीयादितीष्टाशानं हि प्रकृत्यैतत् श्रूयते अतः ऽश्लेवास्यातो शानं भवतीति अतस्तत्संस्तव
एवायं अतो नस्यापेप्रमाणमिति न प्रतिनिधिनिवारणाय प्रभवति। तस्माद्भृतेपि प्रतिनिधिर्भ
वत्येव॥ शब्दे विप्रतिपत्तिः। प्रतिनिधावुपात्ते पि विहितद्रव्यवाचिनि शब्दे अविप्रतिपत्तिरपि परि
मोऽन्तहो भवति। अग्नीषोमाभ्यां छागस्य वपायाइत्यनूहितमेव पि प्रयोज्यं। नतु मेषस्येत्येवं वि
परिणतरूपमित्यर्थः। कुतः। यतः प्रतिनिधिः श्रुतबुध्या गृह्यते। नतु द्रव्यांतरबुध्या। अत छा
गएवायमिति बुध्या गृहीतत्वात् तच्छब्दे नियाभिधानं॥ सोमे नजात्यभावात्। सोमे नतिरश्चीये

कवचनं। सोमान्नावेप्रतिकेषु पात्रेषु सोमेनेति सोमशब्देनैव प्रतीकानामभिधानं कर्तव्यं अ०
स्तुरः० अंशुष्टेदेव सोमाप्यायतामित्येवं। ननु प्रतीकाशब्देन॥ आज्येयादर्शनात्। अविप्रतिर
त्यनुवर्तति। पृषदाज्येनानुयाजान्यजतीति वाचनिके पृषदाज्ये सत्यपि आवाहनादि निग
मेषु आज्ये आज्यशब्दे अविप्रतिपत्तिरविकारः। देवानामाज्यपानित्येव वक्तव्यमित्यर्थः।
कुतः। अदर्शनात्। आज्यव्यतिरिक्तस्य द्रव्यांतरस्य दर्शनात्। तत्पाहि। स्यांद्विकारोयदि
तत्पाहि। पृषक्षद्वो लौकिके विवचनः। वपद्रुमः। वपन्मणिरिति। गुणांवसंपादयितुं दधि
रस्यते। तस्माद्विकारे णो वाज्यपामित्येव वक्तव्यमिति सिद्धांतः। किंच॥ परौ मंत्रवर्णात्।
पत्रावेवोत[illegible] मप्रयाजाप्रेषेप्रवृतेस्वाहादेवा आज्यपा इति। वनस्पतिप्रेषेपि। देवानामाज्य
पानां प्रिया धामानीति। स्विष्टकृत्प्रैषेपि अयाड्देवानामाज्यपानामिति। तत्र नियमतः पृषदाज्ये
नैवानुयाजा इज्यंते। अतएव पप्सु संबंधिनो मंत्रवर्णाद्देवानाज्यपानित्यादावूहो न भवतीति १९
गम्यते। किंच॥ श्रुतेश्च। एककवचनश्रुतेरप्यत्रैकस्यैव प्राधान्यं गम्यते नोनयोः। अपप

पदार्थं गृह्णातीति। यद्विवानद्ध्योपि प्राधान्यं स्यात्तदा द्विवचनं श्रूयेत। न च श्रूयते। अत एकवचन
श्रुतेरप्यर्थमेवाप्यैविसीयते। यदेकस्यैवान्यप्राधान्यमिति तच्चाज्यास्यैवेति प्राक् साधितं॥
अथेदं विचार्यते। व्रीहिभिर्यजेत यवैर्यजेतेति विकल्पेन विहितेषूभयेषु मध्ये एकेन व्रीहिद्रव्ये
णाप्रारब्धे कर्मणि तस्य नाशे दोषापहारादिके जाते पश्चाद्यदि व्रीहयो न प्राप्यंते तदा किं वि
कल्पिकं द्रव्यांतरं यवरूपादेयं। उत व्रीहिसदृशमिति। तत्र मुख्यद्रव्ये सति प्रतिनिध्युपा
दानस्यायुक्तत्वाद्यवानामुपादाने प्राप्ते। सिद्धांतमाह॥ विकल्पे प्रवृत्तं कर्मांतरत्वात्। विकल्पे
सति यत्प्रवृत्तं येन कर्मारब्धं तदेव तस्मिन्प्रयोगेऽगं। इतरद्वैकल्पिकांतरमनंगं। तेन व्री
हिभिः प्रयोगे उपक्रांते तेषामपहारादौ जाते नैव व्रीहिसदृशानीवारादिकमुपादेयं ननु वैक
ल्पिकाः यवाः। कुतः। कर्मांतरत्वात्। व्रीहिभिरार[illegible]न्धप्रयवैः क्रियमाणं कर्मांतरमेव स्यात्। तर
तथैव प्रतिनिधौ प्रवृत्ते तस्यैव तस्मिन्प्रयोगेऽगत्वात्तदपचारे तत्सदृ[illegible]शमेवोपादेयं ननु मुख्यं
तत्सदृशं वा तस्य तत्प्रयोगानंगत्वादिति [illegible]प्ते सिद्धांतमाह॥ प्रतिनिधौ तत्कालत्वात्। प्रतिनिधिद्रव्ये

नीवारादौ चिनष्टे न प्रतिनिधित्वतनीवारादिसाम्येन प्रतिनिध्युपादानं। किंतु मुख्यद्रव्य
मेव व्रीहिरूपमुपादेयं संभवे। तदसंभवे तु मुख्यसादृश्येन नीवारादिः प्रतिनिधिरूपा
देयः। ननु प्रतिनिधिनीवारसादृश्येन। कुतः। तत्कालात्मकालो यस्यासौ तत्कालजः। भावप्रधा
नो निर्देशः। प्रतिनिधेस्तत्कालत्वादित्यर्थः। यतः प्रतिनिधेः स एव कालो यो मुख्यद्रव्यस्य
भावः। तेन प्रतिनिधौ नीवारे विनष्टे मुख्यस्य लाभे मुख्यमेव ग्राह्यं। तदलाभे नीवा
20 रादिकं व्रीहिसदृशमेवेति न तु कदाचिन्नीवारसदृशमित्यर्थः॥ यत्र पत्त्रापद्रव्ययो वि
रोधस्तत्र कर्यं। तद्यथा मुख्यं द्रव्यं खदिरादिकं योजनादिकार्यसमर्थं विद्यते प्रतिनिधिद्रव्यं
च कार्यसमर्थं। तत्र यदि मुख्यं द्रव्यं गृह्यते तदा तत्कार्यं नियुक्तपञ्चनपक्रमणारूपं न सिध्य नि १
ति। यदि च कार्यसिद्धिसमर्थं प्रतिनिधिद्रव्यं गृह्यते तदा मुख्यद्रव्यं गृहीतं न स्यात्। तत्रैवसं
देहः। किं कार्यसाधनं समर्थमपि मुख्यं ग्राह्यं उत मुख्यमनादृत्य कार्यसमर्थं प्रतिनि २०

धिद्रव्यमिति। तत्र मुख्यामुख्ययोर्मुख्ये संप्रत्यय इति न्यायेन मुख्यस्यैव परिग्रहे प्राप्ते सि
द्धांतसूत्रं॥ अर्पद्रव्यविरोधेऽर्पसामान्यं तत्परत्वात्। अर्प्यः प्रयोजनं कार्यमिति यावत्।
द्रव्यं मुख्यद्रव्यं। अर्पद्रव्यविरोधे कार्यमुख्यद्रव्ययोर्विरोधे सति गर्पसामान्यं गर्पे
नप्रयो[illegible]जनेन कार्येतासमान्यसंयुक्तं कार्यसिद्धिसमर्पयित् तदश्रुतमपिप्रतिनिधि
द्रव्यं उपादेयं। कुतः। तत्परत्वात्। द्रव्यस्यार्पपरत्वात्। कार्यार्पत्वात्। कार्यार्थं हि द्रव्यं।
तु अदृष्टार्थं। येनत्वकार्यं न सिद्ध्यति तत् श्रुतमपि सदश्रुतमेव। अतो द्रव्यस्य प्रयोजना
र्पत्वात्तद्विरोधे तु श्रुतमप्यनादृत्य प्रयोजनक्षममेवाश्रुतमपिप्रतिनिधिद्रव्यमेवोपादेयं न
तु मुख्यं कार्यासमर्पमिति सिद्धांतः॥ अष्टाशफपरिमाणायत्रोण कार्येऽन्यिष्वाप्ययाप्ताः पुरोडाश
जातिमात्रान्नि व्यक्तिसमर्पाः व्रीहयोऽप्येपि नन्यं तेतदातैरेव पुरोडाशाः कर्तव्य उतनीवारैः इ
ति संशये पूर्वपक्षे। सिद्धांतमाह। यावत्तमात्रपर्याप्ति हि द्रव्यस्य संनवा पुरोडाशमहत्वार्यं नन्न

वारपरिग्रहः। एवं साम्नाय्येपि प्रधानयागसाधनमपं स्नुवद्दयत्रापि परिमाणम
पि यावद्दुग्धं लभ्यते कष्पंचित्। तावद्वरूमन्नाप्याला नेद तिवरून नवतः। द्यवदान
मात्रसमप्पमुख्यद्रव्या नावेचप्दिव्यविरोधेऽप्यसामान्यमिति न्यायेन प्रतिनिध्युपादानमे
व युक्तं॥ रुक्म व्रीहीणां नखनिर्भिन्नानामिति तत्र व्रीहिशा पि किं चित्तून्यूनं सं
२। पादितं न तिशतः रुक्मानां नीवाराणामुपादाने प्राप्ते माह॥ गुणाद्रव्ययोर्द्रव्यं प्रधानयो
गात। गुणाद्रव्ययोर्विरोधे रुक्मत्वादिगुणमुख्यद्रव्ययोर्विरोधे सति गुणमनादृत्य
द्रव्यमेवोपादेयं। न गुणानुरोधेन प्रतिनिधिद्रव्यं। कुतः प्रधानयोगाद्रव्यस्य। यतो
द्रव्यं प्रधानेन युज्यते। यतस्तत्तूयज्यमानं यागं साधयति। अतो यागस्य द्रव्यं
सन्निकृष्टं। गुणो विप्रकृष्टः। अतो गुणमनादृत्य मुख्यद्रव्यमेवोपादेयमिति। एवं प्राप्ते २१

पूर्वपक्षमाह ॥ न समत्वात् । द्रव्यमेवप्रधानयोगीति यदुक्तं तन्न । कुतः समत्वात् । उभयोर्गुणद्र
व्ययोः सदृशत्वात् । द्रव्यमपि प्रधानयोगि गुणस्तथा च गुणोऽपीत्येवं प्राप्ते उक्तमेव सिद्धान्तं दृढय
ति ॥ गुणानुग्रहात् । गुणेनानुगृहीतं विशेषितं द्रव्यमेव प्रधानयोगि । गुणस्तु तत्र विशे
षणमात्रं विशेष्यं तु द्रव्यमेव । अतो विशेषणविशेष्ययोर्विशेष्ये संप्रत्यय इति न्यायाद्द्रव्य
गुणानुग्रहीतं ५ मेव प्रधानयोगि । नैतदुभयं समं । किं तु । अग्निहोत्रे पुंवत्सायाः अग्निहोत्र्याः पयसोऽभावे पुं
वत्सवत्सलां हित्वा स्त्रीवत्साया अप्यग्निहोत्र्याः पयसा होतव्यं । एवं पालाशानां परिधीनामार्द्रा
णामभावे आर्द्रत्वरूपं गुणं त्यक्त्वा शुष्का अपि पालाशा ग्राह्याः । बाहुमात्राणामसंभवे अबाहुमा
त्रा अपि । एवं सर्वत्र द्रष्टव्यं । यदा पुनः खदिरस्तनुत्वात्तक्षणादिसंस्काराणामयोग्यः । नियोजनमात्रे
योग्यः । कदरस्तु महान् संस्कारयोग्यस्तदा कस्योपादानमिति संदेहः । तत्र संस्कारक्षमकदरोपा
दाने खदिरवि ध्येर्विकल्पमात्रत्वेन अत्यन्तपीडाभावात् । अतः क्षमखदिरोपादाने तु संस्का

रविधीनांगत्यंत पीडाप्रसंगात्प्रतिनिधिरेवोपादेयः। मैवं। नहि गुणारोधेन प्रधानमुपरोद्धव्यं
भवति। तेन भवतु संस्काराणामत्यंतपीडा। न तु प्रधानं तदनुरोधेन कथंचिदपि पीडयितव्यं। तस्मा
त्तद्रक्षणादिना संस्कृतएव खदिरे पशुं नियुंजीत। तदुक्तं जैमिनिना। मुख्याधिगमे मुख्यमागमो हि
तदभावादिति। यदा पुनर्मुख्यं खदिरमलब्ध्वा प्रतिनिधिं कदरमुपादाय तद्रक्षणादिषु कृतिविज्ञं
22 स्कारेषु कृतेषु प्राक्पशुनियोजनात् खदिरं लभ्यते। तदा किमुपात्तेन प्रतिनिधिना कार्यं कुर्यात्।
उत तत्त्यागेन मुख्यमेवोपादेयं संस्कारांश्च पुनः कर्त्तव्यास्तत्रैव पशुं नियुंजीतेति संशये प्राप्ते
सिद्धांतमाह। सति मुख्ये प्रतिनिधिना क्रियमाणां विगुणां स्यात्। अतः संस्कृतमपि कदरं हित्वा
खदिरं संस्कृत्य तस्मिन् पशुर्नियोक्तव्यः। ये च कदरे कृताः संस्काराः तेषां खदिरे आवृ
त्तिः स्यात् प्रधानवन्न गुणावृत्तेर्न्याय्यत्वात्। एवं पशुव्रीह्यादिष्वपि द्रष्टव्यं। तत्रापि प्राकृत्या 22
गात् मुख्यद्रव्यलाभे संस्कृतमपि पुरोडाशादिकं प्रतिनिधिद्रव्यनिष्पादितं त्यक्त्वा मुख्यद्रव्ये

त्पुरोडाशांतरं हि संकल्प्यते न याग: साधानीयः। नियोजने कृते लब्धो पि खदिरःऽनर्थक एव। आध्येदं विश
यते। याग्न्येकप्रधानसंबंधी न्यंगकर्माणि॥ किं तेषामनुष्ठाने कश्चित्क्रमनियमो नास्ति उतास्तीति। तत्रास
त्येवपूर्वपक्षमाह॥ कर्माणामानुपूर्व्यं न युगपद्भावात्। आनुपूर्व्यं पौर्वापर्यं क्रम इत्यनर्थांतरं। कर्माणामिति
आग्न्यन्वाधानादीनामंगकर्माणामनुष्ठाने आनुपूर्व्येण न भवति क्रमनियमो न भवति। कुतः युगपद्भावात्।
यतस्तान्यंगानि यदा प्रधानेनापेक्ष्यंते तदा युगपद्भावेनैव यौगपद्येनैव सहैव संबंधं प्राप्नुवंति न क्र
मेण। ततस्तेषां नियतेन क्रमेणानुष्ठाने कारणाभावात् कर्तुरेकत्वाद् वश्यं भाविनि क्रमे येन
केनचिदनियतेन क्रमेणानुष्ठानं॥ अर्थनिर्वृत्तेश्च। येन केनचित्क्रमेणांगानुष्ठाने क्रियमाणेऽप्यनिर्वृत्ति
रंगकलापनिष्पत्तिः सुखेनैव भवति। नियतक्रमेण क्रियमाणे तु नियतक्रमस्यानागतस्य वस्तुनः
प्रतीक्षणेन विलंबात् बहुना कालेन स्यात्। तथा सति प्रयोगप्राप्तुर्भावो न स्यात् प्रधानप्रत्यासन्नकालो
ह्यंगानां विहितः अंगानां नियतक्रमेणानुष्ठाने वसोपि अतिक्रांतः स्यादिति। तस्मादंगानुष्ठाने क्रम
नियमो नेति पूर्वः पक्षः। सिद्धांतमाह॥ अव्यवहारार्थेन चेदपि तु ----- र्ण्यपदक्रमेण्यः। वाशब्दः पूर्वप

क्षनिरासार्थः। अग्न्यन्वाधानादीनामंगकर्मणामानुपूर्व्यनियमस्यात् अनुष्ठाने क्रमनियमो न भवेत्। ना
नियमः कोन्यः प्रमाणोन्यः। श्रुतेः। अर्थात्। क्रमाच्च। श्रुतेस्तावत्। यथा द्वादशाहे। तेषां गृहपतिः प्रथ
मो दीक्षते अथ ब्रह्माणं दीक्षयति अथोद्गातारमथ होतारमित्यादि। नात्र ब्रह्मादीनां दीक्षा विधी
यते। यजमानत्वादेव तस्याः प्राप्तेः। क्रमस्य त्वन्यतः प्राप्त्यभावात् स एवात्र विधीयते। यथा तस्मादे
षद्दशमो ग्रहो गृह्यते तृतीय एव वषट्क्रियत इति अयमपि श्रुतिक्रम एव। अर्थादपि क्रमो वगम्यते।
23 तद्यथा। येषामसंभवनयोरवघातपेषणयोः अग्निहोत्रं जुहोति यवागूं पचतीति क्रमेण श्रुतेपि
पर्यात्पूर्वं पाकस्ततो होम इति होमद्रव्याक्षिप्यवागूः तदुत्पत्त्यर्थः श्रुत्या लिंगेन वपाकः। स च पश्चा
त्क्रियमाणोऽनर्थकः स्यात् होमोऽपि असति द्रव्येन निवर्तेत। अतः पश्चाद्धोमः कार्यः। क्रमः सद्विवि
धः श्रुतिपाठक्रमो मंत्रपाठक्रमश्च। उभयविधोऽपि क्रमनियमे कारणं भवति। नियते न हि क्रमेण 23
पदार्थविधिपाठो मंत्रपाठश्च वर्तते। तच्चेवगम्यते। येन क्रमेण पदार्थविधिपाठो मंत्रपाठ
श्च तेनैव क्रमेणानुष्ठानमिति। क्रमांतरेणानुष्ठानविधि क्रमांतरेणानुष्ठाने क्रमगतस्य क्रमस्य त्यागः।

अनवगतस्य क्रमस्योपादानमित्यसंगतं स्यात्। तस्मात्पाठक्रमादपि क्रमनियमोंगकर्मणां भवतीति॥
प्राकृतं च विकृतौ। अतोपि कारणात्पाठक्रमेणांगकर्मणामनुष्ठानं भवति। यतो विकृतौ प्राकृतमेव पदार्थानां क्र
मं श्रुतिरनुवदति। यथा महापितृयज्ञे सन्तत एव प्राकृतं च यजुर्हरसीत्यादिना सयज्ञोपवीता भवाज्यानि
गृह्णातीत्येवमंतेन। आज्यग्रहणे यज्ञोपवीतित्वविधिपरे वाक्ये प्राकृतं क्रमं दर्शयति। यदि पाठक्रमेणा
नुष्ठानं न स्यात्। तदा तेन च क्रमेणानुवादो न स्यात्। अपरे च न्यायाव्याचक्षते॥ प्राकृतं च विकृतौ।
विकृतौ प्राकृतवैकृतयोः कर्मणोः संनिपाते प्राकृतं पूर्वं कर्तव्यं पश्चाद्वैकृतमिति। तद्यथा प्रकृतौ प्रा
यणीयां ह्यष्टाइत्यासानमालभन्ते इति प्रस्तरहरणानुप्रहरणानंतरमात्मालंभनमुक्तः। विकृतौ प्रस्त
रणं तेन स्वरतिइतिहरणानुप्रहरणानंतरं वाजिनयागउक्तः। तत्र पूर्वं प्राकृतं आत्मालंभोदकस्पर्श
रूपं कृत्वा पश्चाद्वाजिनयागः कार्यः। तथा प्रकृतौ हविरासादनोत्तरकालं हविरालंभात्मालंभो
क्रि २ दकालंभा विहिताः। विकृतौ वासाद्य [illegible]ठः पश्चाग्निमंथतीत्यग्निमंथनं हविरासादनोत्तरकालं विहितं।
पूर्वी तत्रैव प्राकृतं हविरालंभात्मालंभोदकालंभाः पश्चाद्वैकृतमग्निमंथनं। एवमपि आसाद्यस्त्वचोप

उपस्पृश्य पराजानं ब्रपादयतीत्येदप्युदाहार्यं । ऽत्रापि पूर्वं प्राकृताह विरालं नात्मालंभोदकालंभाः पश्चाद्धे कृतं
सौमप्रपादनादि । तथापि - त्यद्वे परिशेषकात्प्रागिडाभक्षणमार्जनेएव प्रतिपत्तिदक्षिणादानान्यत सिद्धानि । सुत्या
यांवसवनीयपुरोडाशानांनिर्वपणा दूर्ध्वं नाचिनः प्रागलंकरणाद्धे पदाभ्यस्तेषांप्राकृप्रवरणाद्धोमादन
रवानुष्ठानं सिद्धं । ऽतएव पशोप्राकृतं पूर्वमिति । ऽस्यबाधनाय यत्नं करोति उत्तराघारमाघायपश्चुं पूर्वः
समनक्तीति । ऽत्र पूर्वमित्यनेन प्राकृतध्रुवासमञ्जनात्पूर्वं पश्वञ्जनं विदधाति । तस्मात्समीचीनामत द्या
स्थानं । ऽपक्रमप्रमाणानां विरोधेबलाबलं निर्णीयते । यत्र पाठक्रमार्थक्रमयोर्विरोधो भवति । तद्यथा
सविपर्णशाखया वत्सानपाकरोति तामाच्छिनत्तीति पाठक्रमः । ऽर्थस्तु अनेन क्रमेणानसिद्ध्यति नह्यच्छिन्न
याद्वृक्षस्यशाखया वत्सापाकरणं कर्तुं शक्यते वत्सापाकरणायैव च्छेदनमिति । तत्र किं पाठक्रमात्क्र
माध्यवसानमुतार्थक्रमादिति संशयेसत्याह ॥ विरोधेऽर्थस्तत्परत्वात् । पाठक्रमार्थक्रमयोर्विरोधेऽर्थ
क्रमएवबलीयान् । नपाठक्रमः । कुतः । तत्परत्वात् । पाठस्यार्थपरत्वात् । ऽर्थस्याप्यपरत्वात् । कार्यसिद्ध्यर्थ
त्वादित्यर्थः । तेनपूर्वं छेदनं पश्चात्तयाच्छिन्नयाशाखया वत्सापाकरणमिति । ऽन्यच्च यत्र श्रुतेः श्रुति २४
पाठक्रमस्य च विरोधो भवति । तद्यथा सरः स्फिते यद्ब्राह्मणां तपस्थित विज्ञायादितिश्रुतिः कर्मणिसम

प्रे त्वेपं विदधाति पाठक्रमात्तु स्विष्टकृतः पश्चात्प्राशित्रावदानात्पूर्वमिति। तत्र केन क्रमेणानुष्ठानमिति संश ब १
सत्याह॥ श्रुतिः क्रमादानुमानिकत्वात्। क्रमादिति श्रुतिपाठक्रमात् श्रुतिर्बलीयसी। तेन श्रुतिप्रतीतक्रमेणै
वसंस्थिते कर्मणि। प्रेषोच्चारणं। न पाठक्रमेण। कुतः। आनुमानिकत्वात्पाठक्रमस्य। अर्थात् श्रुतेः प्रत्यक्ष
त्वादिति ज्ञेयं। प्रत्यक्षा हि श्रुतिः सं॰स्थिते यजेइति। पाठक्रमे त्वनुमानं। अतोऽनेन क्रमेण पदार्था अनुष्ठेय :।
यतोऽनेनैव क्रमेण पाठ इति। दुर्बलं च प्रत्यक्षादनुमानं। अतः श्रुतिक्रमेणैवानुष्ठानमिति सिद्धं। एवं तस्मादर
मोग्रहो गृह्यते तृतीय एव वषट्क्रियत इत्येतदप्युदाहरणं। अयं किं श्रुति मंत्रपाठक्रमात्तृती
यस्थाने गृह्यते। उत श्रुतिबलाद्दशम इति। तत्र श्रुतिबलाद्दशम इति सिद्ध्यति। अपवादनापाठक्रमस्य तु २
मंत्रपाठक्रमस्य च परस्परं विरोधे भवति। यथा आज्याधिश्रयणे सो सावाज्यमधिश्रयती ये चेत्यधिश्रयणं
विधाय तदनंतरमेव तत्पुनरुद्वासयत्यूर्जेत्वेति चोदनापाठे आज्याधिश्रयणमंत्रा नंतरं घर्मोसि विश्वा
पुरित्यादि पश्चात्संनहनमंत्रांतं मंत्रगणं पठित्वा आज्योद्वासनमंत्र ऊर्जेत्वेति पठितः। पूर्वाधिकरणे हि क्रमात्
श्रुतेः प्रत्यक्ष बलीयस्त्वमुक्तं। अत्रोभयोः प्रत्यक्षत्वात् किं चोदनापाठक्रमेणाज्योद्वासनं कर्तव्यं उत मंत्र

पाठक्रमेणेतिसंज्ञायेसत्याह॥ मंत्रचोदनायामंत्रबलंप्रयोजित्वात्।मंत्रचोदनयोरितिमंत्रपाठचोदनापाठ
योर्विरोधे मंत्रबलंमंत्रपाठएवबलवानित्यर्थः।कुतःप्रयोजित्वात्मंत्राणां।मंत्रा हि कर्मकालेप्रयुज्यते
पठ्यंते।नचोदनाःचोदनापाठस्तु विप्रकृष्टः॥मंत्रस्तुप्रयुज्यमानएवाभिधानएवाभिधानतएवस्मार
कइतिसंनिकृष्टः विप्रकृष्टाच्चसंनिकृष्टंबलवदित्येवंप्राप्तेआह॥ नसमत्वात्।मंत्रपाठएवबलवा
नितियदुक्तंतंन।कुतःसमत्वान्मंत्रपाठचोदनापाठयोः।कथमुभयोःसमता।उच्यते।मंत्रःकर्म
25 णिक्रियमाणस्य कर्मणः स्मारणार्थंप्रयुज्यते।चोदनात्वनुकर्मणोविधायिका।अतएवचो
दनायाःप्रवृत्तिःपूर्वं।यतःपदार्थेविहितेसतिपश्चात्तस्मारणार्थोमंत्रःप्रयुज्यते।अतःस
ममेवेतदितिप्राप्तेसिद्धांतमाह॥ गुणानांतुभूयस्त्वात्।तुशब्दःपक्षःपूर्वपक्षनिरासा २५
र्थः।नेतदुभयंसमं।किंतुमंत्रपाठएवबलवान्।कुतः।मंत्रेषुगुणानांभूयस्त्वात्।गुणा

नांबाधः स्यात्। यतो चोदनापाठापेक्षया मंत्रेषु बहवो गुणा विद्यंते। तद्यथा। कर्मकाले उच्चारणं पदार्थस्मारक
त्वं। यतो मंत्रो ऽनर्थवादादिकृतव्यवधानरहिताः क्रमेण पठ्यंते। तेनोत्तरमुत्तरं पदार्थं झटिति स्मारयितुं श
क्नुवंति। नैवं चोदनापाठः। विधेयार्थस्तावकवाक्यसंदर्भव्यवहितत्वेन मंत्रवत्स्मारयितुमशक्तत्वात्।
नच कर्मकाले तस्योच्चारणं विहितं मंत्रवत्। श्रुतिरपि मंत्राणां गुणान्तरं तत्स्वयमाह तस्माद्देतदृषिणाभ्यु
क्तमित्यादिना। यो हि स्वप्रतिपादितस्यार्थप्रामाण्यार्थमन्यस्योक्तिं प्रदर्शयति स ज्ञात्मापेक्षया
उत्कृष्टस्यैव दर्शयितेति न निकृष्टस्य। तेन गुणान्तरयुक्तत्वं मंत्रेषु। अतो मंत्रपाठ एव बलवानिति सिद्धं। पदार्था वा
नां क्रमनियमे श्रुत्यादीनि त्रीणि प्रमाणान्युक्तानि तेषां विरोधे बलाबलं चोक्तं।। अथेदं चिंत्यते। यत्र बहूनि
प्रधानानि सह क्रियंते। यथा दर्शपूर्णमासयोराग्ने[illegible]योपांशुयाजाग्नीषोमीयैंद्राग्नादीनि। यथा चातु
र्मास्यपर्वसु वाजपेये ऽतिरात्रपशुवराश्मपृश्निसप्तदशास्तु प्राजापत्येषु च। तत्र आरादुपकारका २५
ण्यंगानि सर्वेषां तंत्रेण क्रियंत इति वक्ष्यति कर्मणां युगपद्भावस्तंत्रमित्यत्र। तेन न तेषु क्रमचिंता। सं
निपात्योपकारकाणि तु द्रव्यसंस्काररूपाणि प्रतिप्रधानं भेदेन कर्तव्यानि। तत्र चिंत्यते। तानि किं

एकैकस्यप्रधानस्यसर्वाणिकृत्वाऽपरस्यकर्तव्यानि।किंवासमानएकैकःपदार्थःसर्वेषांकर्तव्यइति।
तत्रैकैकंप्रधानंअव्यवहितानिस्वांगान्यपेक्षते।तत्रांगानांप्रधानकालत्वंचस्यन्यायप्राप्तत्वादेकैकस्मै
समापयेत् न्गुणकांडमपवृज्यात्।इतरथाहिपदार्थानुसमयेसतिस्वप्रधानाद्विप्रकृष्येरन्।यद्येकस्यसादनं
कृत्वापरस्यतदेवक्रियेते।तदापूर्वस्यासादनान्तेनयोर्व्यवायःस्यात्।सहवचनंतूपकारादुपका
रकसाहित्यमात्रेणाप्युपपद्यते।तस्मात्कांडानुसमयएवेतिप्राप्तेऽत्राह॥ तुल्यसमवायेसामान्य
पूर्वमानुपूर्व्ययोगात्।तुल्यसमवायेतुल्यानांप्रधानानांसहप्रयोगेद्रव्यसंस्काररूपाणिसंनिप
26 त्योपकारकाणांगानिसामान्यपूर्वंकर्तव्यानि।पूर्वःपूर्वःपदार्थःसर्वेषांसमानःसन्दृश्यःकर्तव्यः।त
द्यथाबर्हिषुहविःषुप्रथमंसर्वेषांपात्रीस्थापनंततःसर्वेषांतत्रस्थाभिघारः।ततःसर्वेषांपात्रीषूपस्तारः। २६
ततःसर्वेषांप्राणदानं।ततःसर्वेषांकपालांजनं।ततःसर्वेषांकपालोद्वासनं।ततःसर्वेषांवेद्यामासाद
नं।ततःसर्वेषामालंभनः।इत्येवंपदार्थानुसमयःकर्तव्यः॥यद्येकैकस्मिन्गुणकांडमपवृज्येत

तथासतिक्रमेणप्रयोगात्प्रयोगवाक्यावगतस्य साहित्यबाधः स्यात्। नहि वचनेनातिरेण
ताक्साहित्यमवगम्यमानं काल्पनिकेन प्रधानासत्तिमात्रेणाशद्धुपकारस्य विषयमात्रं कल्प
यितुं शक्यते तस्मात्पदार्थानुसमयः। कुतः। आनुपूर्व्ययोगात्पदार्थानां तन्मंत्रा
णां च। एवं क्रियमाणे पदार्थग्ज्ञानुपूर्व्येणानुक्रमेणायुज्यं तेतन्मंत्राय। अन्यथोत्तर
पदार्थकरणानंतरं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात्। अथेदं विचार्यते।
दर्शपूर्णमासयोराग्नेयाग्नीषोमीय निर्वापयोः पदार्थानुसमये स्थिते किमेकैक
मुष्टिनानुसमयः उतचतुर्भिर्मुष्टिभिरिति। तत्र यद्येकैको मुष्टिः पृथक्पदा
र्थः ततएकैकेनानुसमयः। उताष्टाभिरेकादशाभिस्त्रिरिति। तथा हि रव
घातिहि दर्शिणामनान्त्रि ... विरूतर मिति। वपनेवदहिणोत्तरगोदाने
अथचतुर्भिर्मुष्टिभिर्निर्वापएकः पदार्थः ततश्चतुर्भिर्मुष्टिभिरिति। एवं कपालेोपधाने किमेकैकेना
कपालेना ... अनुसमयः।

पावनेनवत्रिः पावयतीति किं प्राप्तं। एकैकमुष्टिनेति कुतः। एकमुष्टिनिर्वापो ह्ये
कः पदार्थः। नवतु मुष्टिनिर्वापः। कूप्यं। एकस्मिन्मुष्टौ निरूप्तेऽप्रयत्नः पर्य
वसितो भवतीति न शक्यं वदितुं किंचिन्न निरूप्तमिति। नयनिरूप्ते निर्वा
पो न कृतः स्यात्। नवमुष्टिमात्रेण निरूप्तेन न प्रयोजनं। न ह्येकस्मिन्नपि नि
27 रूप्ते नवचारः संभवंति मुष्टिसमानाधिकरणो हि नवतुः शब्दः। तस्मान्मुष्टि
नामनुसमयः कार्यः। एवं कपालेष्वनुपदधातीति तत्राप्येकैककपालेनानु
समयः कार्यः। एकैकेनावदानेन सांनाय्यसवनीयादौ। अहर्यजने एकैकत्यागं तन्त्रेण 27
पनन्गमनेकयजमानकेऽप्येकैकजोद्दानसंस्करणेन। पावनेवाऽनेकयजमानकेऽप्येवमेकैकवार
पावनेनेति। तदुक्तं जैमिनिना।

मुष्टिकपालअवदानअभ्यंजनवपनपावनेषु ब्वेकेकेनइति। एवंप्राप्तेऽआह।। नैककर्मणि संबंधात्।
एकं नैककर्मणि एकस्मिन्निर्वापे कपालोपधानादिरूपे कर्मणि पदार्थे तदवयवेन एकैकमुष्टिना एकैक
कपालोपधानरूपे साङ्गुसमयो न भवति। किं च चतुर्मुष्टिभिः अष्टभिरेकादशभिश्च कपालैः।
न ह्येकैको मुष्टिः पृथक् पृथगित्यर्थः। किं तर्हि चतुर्मुष्टिभिर्निर्वापे एकः पदार्थः। कुतः संबं
धात्। चतुःशब्दस्य मुष्टीनां च निर्वापसंबंधात्। एवं च सहकर्मणाऽनेकगुणा [redacted] विधाने
न्यायां इतरथा चतुःसंख्याया मुष्टिसंबंधे मुष्टीनां च निर्वापसंबंधे सति विरूप्यलक्षणो वाक्यभे
दः प्रसज्येत। अनिर्वापाङ्गं च संख्या स्यात्। विरूप्यं चैवं। चतुरो मुष्टीन् निर्वपतीत्य च निर्वापं प्रति
मुष्टीनामुपादेयत्वं विधेयत्वं गं गत्वं चेति त्रिकं संख्यां प्रति च तेषामुद्देश्यत्वं गुणत्वं अनुवाद्यत्वं प्रधानत्वं
चेति। एतत्परस्परविरुद्धं त्रिकद्वयं मुष्टीनामापद्यते। तस्मात् संख्याया मुष्टीनां चोभयोर्निर्व
पतिनैव संबंधः। ये च चत्वारस्ते मुष्टयः। ये मुष्टयस्ते च चत्वारः इति परस्परं व्यवच्छेद्य व्यवच्छेदक

नावोकहायनान्यायेनद्रव्यस्यगुणावछेदकत्वेनगुणस्यचद्रव्यावछेदकत्वेनाप्युपद्भवति।नचैवंवाक्या
तेनवाक्यभेदोनभवति।तस्माच्चतुर्मुष्टिनिर्वापएकःपदार्थः।अंगपर्या योर्हिपदार्थत्वाविशेषे
नययोःप्रधानयोःसहानुष्ठानं।तयोर्यदंगंतदेकस्यकृत्वापरस्यकर्तव्यं।चतुरोमुष्टीन्निर्वप
तीतिशास्त्राच्चतुर्मुष्टिनिर्वापोऽगं।सर्वपदार्थः।तदवयवस्त्वेकोमुष्टिः।नपदार्थः।नचावयवेना
नुसमयः।किंतर्हिपदार्थेन।एवंकपालोपधानादिष्वपिअष्टाकपालमेकादशाकपालंनिर्वपती
तिनिर्देशात्तावतामुपधानमेकःपदार्थः।द्विरवद्यतितिरस्यंतेदक्षिणोत्तरगोदानवपने
28 त्रिःपावयतीतिच।एवंवसंख्यादीनांक्रियांगत्वंचभवतितस्मात्समुदायेनानुसमयइतिसिद्धं।
एवंसर्वत्रपदार्थानुसमयेप्राप्तेक्वचित्तदपवादंकांडानुसमयमाह॥ग्रहणासादनावदानप्रदाने
षुउवचनात्।सोमेग्रहाणांग्रहणेएकैकस्यग्रहस्यग्रहणांसादनांतंकर्तव्यं।अनेकहविष्केवा २
यदानंप्रदानांतंकर्तव्यं।वचनात्।वचनंचऐंद्रवायवादीनांसादनांतंपठित्वाअथ्यातोगृह्णाति २८

वार्यं वां मित्रावरुणेति मध्यमं पिनं गृह्णातीत्यादिकं । व्यूढछंदसि द्वादशाहे ग्रहव्यूहे
तं...री बा नसादयतीत्ययं सादनप्रतिषेधश्चान्यत्र ग्रहणानंतरं तत्कालमेव सादनं
बोधयति । वरुणप्रघासादिषु यानेकहविष्केषु प्रदानस्य प्रदानांतता सर्वेषु प्र
धाने यागेषु प्रत्यक् प्रत्यक् कूर्यपते । उत्कर्षो विशेषापेक्षैः एवं सर्वत्रावदानेषु प्रदा
नांते प्राप्ते आह ॥ नवद्यानेदेगुणयोगादिति वाक्यः । वाक्यदर्शयिरित्याह । द्रव्याणां पुरोडाशचरु
सान्नाय्यपश्वादीनां भेदे पृथक्त्वावेनानात्वे बहुत्वे सत्यपि देवतात्वे समाना भवति यागमु
द्दिश्य तानि त्यज्यंते तर्हि अवदानं प्रदानांतं न भवति । किंतु सर्वाणि क्रमेणावदाय सकृ
द्वते षां प्रदानं कार्यमित्यर्थः । कुतः । गुणयोगात् । द्रव्याणां यागं प्रति गुणत्वेन संयोगात् । अं
गत्वेन संबंधात् । प्रधानं हि यागः । द्रव्याणि वांगभूतानि । तत्र यागश्चेत् न्यायेन सकृदेव

सिद्धांतितदा यद्यवदानं प्रदानांतं क्रियते तर्हि गुणानुरोधेन प्रधानावृत्तिः कृता नवतिन्न
वासा विष्यते । तस्मात्तत्रावदानं प्रदानांतं न कर्तव्यं । किंतु सर्वाण्यवदानान्यसहप्रदेयानि । तद्यथा ।
दर्शेष्टौ दधिपयसोर्यागे । सर्वत्र स्विष्टकृद्यागे वा ऽनेकहविष्कं । सप्तदशसु प्राजापत्ये
षु वा । अथेदं विचार्यते । किं दर्शपूर्णमासचातुर्मास्यपश्वादिके प्रारब्धे ऽपरिसमाप्ते
वसति नियतस्य नियतकालस्याग्निहोत्रपितृयज्ञादेः काले आगते सति किं तन्मध्य
२९ एव तत्कर्तव्यं । उत न कर्तव्यं इति । यद्यपि वाच भिन्नप्रयोगयोः प्रारब्धकर्मा
[illegible] त्रयोर्न मिथः क्रमोऽगं । तथापि सायंकाले द्वयोः संनिपातितघोरयत्रयं ना वि
निक्रमे प्रारब्धसमाप्य अग्निहोत्रे हूयमाने तस्य स्वकालातिपतिप्रसंगे सति किं
युक्तमिति विंत्यते । तत्रेष्टिपश्वादिकं [illegible] स्व काला दतिपन्नमेवा तस्योन्न २९

यथापिनकविद्धिश्रोषः। अग्निहोत्रस्यउतसित्व लेक्रियमाणस्यउद्धरणात्नोपःस्या।
दुकपेत्तिकाललोपः। तत्रकस्यानुग्रहः कस्यलोपइतिचिंत्यते। तत्रोद्धरणानुग्रहेसोप्रयो तिर
गावधारणोत्तरंकालप्राप्तेःकालस्यजघन्यत्वेनबाधःप्राप्नोति। किंचपूर्वस्यव्यवधानंस्या
न्मध्येक्रियमाणे। तस्मात्कालबाधइतिप्राप्तेआह॥ प्रवृत्तेनियतंदोषविशेषात्॥ प्रवृत्तेप्रारब्धे २न
इष्टिपश्वादिकेकर्मणिनियतस्यकालेआगतेनियतंनियतकालीनंअग्निहोत्रपिंडय
ज्ञादिकंतन्मध्यएवकर्तव्यं। कालस्यानुपादेयत्वेननिमित्तत्वात्तस्मिन्प्राप्तमग्निहोत्रं
उद्धरणमनादृत्यापिकर्तव्यं। कुतः। दोषविशेषात्। यतोनित्यस्याकरणेदोषोभवति।
ननुपूर्वस्यकर्मणोव्यवधानेपिदोषोस्त्येव। सत्यं। आक्रियमाणेतुविशेषणादेनोनि
त्यकर्मणोव्यवधानरूपा क्रियेति। क्रियमाणेपुनरंगभूतेनांपदार्थानांव्यवधा

नमात्रं। ननु क्रमस्य वचनलोपः। अत एवोक्तं दोषविशेषादिति। अपि वा संबंधेन व्यवधानेपि न दोषः।
तस्मान्नियतकालीनं कर्म मध्येपि कर्तव्यं। अथेदं चिंत्यते। ज्योतिष्टोमे षोडशिनं प्रकृ म
त्या [illegible]ायात तं परां च मुक्त्वेत्यो विगृह्णातीति। तथेदमपरं श्रूयते तां विपुरस्ताम
य्या दु पाकरोत्यस्तमिते नु शंसतीति। शाखांतरे च समया ध्युषिते षोडशि
नः स्तोत्रमुपाकरोतीति। एवं सति यदि देवाद्गृह्यानामुत्कर्षः स्यात्। तदा किं षो
30 डशिनोत्कृष्यते उक्थ्येभ्यः पूर्वमपि प्राग स्तमयात्षोडशिन उपाकरणं कर्तव्यं। अथ वोक्थ्यो
त्कर्षे सति षोडश्यप्युत्कृष्यते उक्थ्यविग्रहेभ्यः पर एव भवतीति। तत्र पूर्वाधिकरणोक्तन्या
येन नियतकालत्वादंगानां ग्रहं गृहीत्वा च मसं वोन्नीय स्तोत्रमुपाकुर्यादिति वचनात्तदंग ३०
तां गतं स्तोत्रमप्युत्कृष्येत। तत्र पुरास्तमयादिति विहितः कालो बाध्येत। ननु चानुत्कर्षपक्षेपि
परिप्लावो बाध्येत। बाध्यतां। क्रममात्रं हि तत्। कालस्तु बलीयानित्युक्तं। तस्मादनुत्कर्ष

इतिप्राप्तेआह ।। षोडशि निचानुपूर्व्यन्यस्चात् । तुशब्दः पूर्वाधिकरणसिद्धांताद्भेदे । षो
डशिनि तु अनुत्कर्षो न भवति । किंतु कर्ष एव ● । कुतः आनुपूर्व्यन्यस्चात् । आनुपूर्व्यस्य
क्रमस्य न्यस्चात् महद्बाद्धलवत्त्वादित्यर्थः । कथं । तंपरावमु● क्थ्येभ्यइतिवचनात् । षो
डशियागाभ्यासस्योक्थ्येभ्यउपरिभावेऽंगसोऽनुक्रूष्यमाणो प्रधानांगं सद्बाधेत । न
चैतद्युक्तं । अतो । वरमंगान्तरस्तोत्रांगस्यैव कालस्य बाध इत्युत्कर्ष एव षोडशिन इति
३ निः सिद्धां●ः संदिग्धं वस्तोत्रस्य संनिहितग्रह यागांगत्वं । तथा चोक्तं पंचमस्य प्रथमपा
दांत्याधिकरणे तत्र र●नेनग्रहणक्रमानुग्रहार्थमुत्कर्षो विधीयते । किं तर्हि यागक्र
मानुग्रहार्थं । तस्य च स्तोत्रं प्रतिप्राधान्यम विवादं अत स्तस्य यागाभ्यासस्य काले नांगस्य
स्तोत्रस्य कालो बाध्यत इति युक्त एवोत्कर्ष● । किं वा अनुत्कर्षे षोडशिनो वेगुण्यं । उक्थ्य
विग्रहाणां वा । उत्कर्षे विकस्य षोडशिन इति । अतोपि उत्कर्ष एव । इदानीमिदं चिंत्यते । यद्यपि वस्वा
ध्यायविहिते पाठे क्रमार्थवत्वात् यागेषु समिदादिषु क्रमनियमः । तथा क्रत्वंतरेष्वपि । तद्वाक्या
नामपि हि विचद्भित क्रममेवाध्ययनं स्वाध्यायविधिना विधीयते तस्य च प्रयोजनांतरं नास्त्यतः । क्रमानुष्ठानात् । तस्मा
क्र●चंतराणामपि पिठितपच्युमवसोमयागा [illegible] पाठक्रमेणानुष्ठानमिति पूर्वः पक्षः ।।

सिद्धांतमाह। ज्ञानियमः फलसंयुक्तेषु। फलसंयुक्तेषु प्रधानकर्मसु इष्टिपशुसोमयागाद्या
त्मकेषु अनुष्ठाने ज्ञानियमः क्रमनियमो नास्ति। तत्र काम्येषु तावत् न क्रमनियमः। ज्ञानियामे
नहि कामा उत्पद्यंते। तेषां वनास्ति क्रमः। नहि ते वाक्यक्रमेण नियंतुं शक्यंते। वस्तुस्वभावस्य
निरंकुशत्वात्। अतो नियतक्रमाः कामाः कर्मणामप्यनियमं प्रतिपादयंतीति तद्बले
न पाठक्रमस्यैबाधः। अपि च क्रतूनामनंगवादेकप्रयोगवचनाभावाद्वचनास्ति क्रमः॥
31 यदि वक्रतवः परस्परस्यांगं भवेयुः यदि वा सर्वैरेतैऽन्यस्य कस्यचित्समिदादिवदंगं स्युः।
यदि वा असत्यप्यंगत्वे आग्नेयादिवदेकप्रयोगवचनपरिगृहीताः स्युस्तः सर्वेषां स
हानुष्ठानं बोधयन्प्रयोगविधिः क्रमनियमं मन्यतोपेक्षमाणः पाठं तैर्वां मकत्वेन
गृह्णीयात्। न चैतदस्ति। न च पाठः स्वयमेव क्रमस्य विधायकः स्वाध्यायवि ३१
धिरपि यत्प्रयेन शक्यते कर्तुं तत्रात्रैव नियुक्तो। पाठक्रमस्य प्रयोगवचनो कांक्षितक्रम नियाः ४
नियममात्रं शक्नोति कर्तुं न क्रमविधानं तस्माद्भिन्नप्रयोगवचनपरिगृहीतानां न पाठ

तः क्रमनियम इति सिद्धं। तर्हि पाठक्रमः किमर्थ इत्यत आह॥ क्रमो विध्यर्थः कर्मणामसं
वात्। क्रमो विध्यर्थः। विधानाद्योऽपपारायणाध्यापनादिज्ञानेनैव क्रमेण पाठनार्थः। ना
नुष्ठानार्थः। कुतः। सर्वस्वारात्परे कर्मत्तिअसंनवात्। पाठक्रमेणानुष्ठानासंभवात्। यतः
सर्वस्वारो मरणकामस्य विहितः। यदि पाठक्रमेणानुष्ठीयंते तर्हि सर्वस्वारेण मरणे सति सि
द्धे सति कथं तत ऊर्द्धं कर्माणि कर्तुं शक्यंते। तस्मात् क्व चनुष्ठाने क्रमनियमो न भवतीति
सिद्धं। इदानीमिदं विचार्यते। किमवत्तस्योद्धृतस्य ह्यवदानमात्रस्य नाशे हविरंतरमुत्पा
द्यं उत तस्मादेव हविःशेषात्पुनरवदेयमिति। तत्र सूत्रेणोवप्रपयं सिद्धांतमाह॥ प
अवत्तनाशेऽन्यद्गुणानुग्रहात्। अवत्तस्य पुरोडाशा च्चवदिः सकाशात्पृथक्कृतत्वात् तस्यावदा
नद्वयमात्रस्य नाशे। अन्यद्विरुत्पादनीयं गार्पं। कुतः। गुणानुग्रहात्। एवं कृते मध्य पूर्वा
र्द्धावदिन रूपेणागुणेनांगेन संधनं तेन यागोऽनुगृहीतो भवति कृतो भवति। यदि पूर्वं ह

विशेषादेव पुनरवदाययागः क्रियेत तदा तस्य मध्यपूर्वार्द्ध विकलत्वाद्विगुण एव यागो न्नवेत्।
कर्पं। द्व्यवदानस्यैव यागापूर्वत्वपक्षे तस्य विनष्टत्वादवशिष्टस्याया यागापूर्वत्वात्। समस्तपुरो
डाशस्य यागापूर्वत्वेपिद्व्यवदाननाशेन तस्य विकलत्वात्। नवासौ यागो विगुण इष्यते। तस्मा
द्विरन्तरमेवोत्पाद्यं उद्धृतद्व्यवदाननाशेनुतिप्राप्तेराह॥ नपूर्वशेषात्। यदुक्तमवत्तना
३२ शे ऽन्यदुत्पादनीयमिति तन्न। किं तु पूर्वशेषात्। पूर्वस्य वाशिष्टस्य हा विषः शेषात् पुनरव
देयं। कुतः। विनष्टेपि द्व्यवदाने पुनर्मध्यपूर्वार्द्धसंनवात्। तावमात्रस्य वशास्त्रार्थत्वात्। पुरोडाश
स्य यौ मध्यपूर्वार्द्धावयवौ तदपादानकं तद्द्वयं तूतमवदानद्वयं यागसाधनं। नष्टेव मध्य
पूर्वार्द्धविषयविनिपूर्वंसकलरूपे पुरोडाशे यो मध्यावयवः पूर्वार्द्धविषयवस्त्वावदानापादा
नन्ततः। स एवावदानापेक्ष्यावयवी। तस्मिन्नवदानोद्धरणेन विनष्टेपि मध्यान्तरस्य पूर्वा
र्द्धान्तरस्य चावदानद्वयोपलक्षणत्वेन विद्यमानत्वात्तत एव पुनरवदेयान नु कृत्स्नस्य मध्य ३२
पूर्वार्द्धेवदेयेन विकल्पस्येति चेत्तन्न उक्तशास्त्रार्थत्वात् मध्यादवद्यतीत्येतावदेव स्

यते। न तु स्वकस्यास्य कलस्य पुरोडाशस्य मध्यादिति। तस्मात्पूर्वशेषादवदेयमिति।
अवोदितद्वात्। अवतश्चावदानमात्रेणा शेषे अन्यच्च विरुध्यानीयमेवं। अवोदितत्वात्
कुत्राप्यविहितत्वात्पूर्वशेषाद्देवावदेयं॥ स्विष्टकृद्दानुपूर्व्ययोगात्। अपि च शेषात्
अवदीयमाने तद्धविः स्विष्टकृद्भवति। स्विष्टकृदस्यास्तीति स्विष्टकृद्वत्। अन्यस्मिन्नु ह-
विषि उत्पादिते तु इदं पूर्वं हविः स्विष्टकृद्वन्न भवति न हि तदा ततः स्विष्टकृदर्थमवदानं क्रि-
यते। किं तु नूतनोत्पादितादेव। कुतः आनुपूर्व्ययोगात्। यतः स्विष्टकृदवदानस्यानु-
पूर्व्ययोगोऽस्ति। प्रधानादवदानानंतरं हि ततः स्विष्टकृदर्थमवदानं भवति। यदि
च प्रधानावदानमेव पूर्वस्मान्न क्रियते स्विष्टकृदर्थमपि ततो न क्रियेत। ततः पूर्वस्य ह वि-
ष उत्पत्तिर्व्यर्था पूर्वस्यात्। शेषात्तु प्रधानार्थे चदीयमाने स्विष्टकृदर्थमपि ततो वदीयत
एवेति पूर्वं हविः स्विष्टकृद्भवतीति पूर्वपक्षे ब्रूमः। अप्रोक्तमेव सिद्धांतं द्रढयति॥ गुणाहानो
उत्रोपपत्त्याभावात्। उत्राब्दः पक्षव्यावृत्तौ। गुणहानाविति गुणस्य यागं प्रति गुणभूतस्य या

गसाधनभूतस्य द्व्यवदानस्य हानिर्गुणहानिः हविषो मध्यपूर्व[illegible]भागस्य यागं प्रति
गुणभूतस्य यागसाधनभूतस्य हानौ सत्यां नाशे सति न पूर्वशेषादवदेयं । कुतः
शेषाभावात् । शेषत्वादेव । तस्यावशिष्टस्याशेषकार्यार्थत्वादित्यर्थः । कृत्स्नस्य
हि पुरोडाशस्य यो मध्यदेशस्तदपादानको यस्तस्योपरितनांगुष्ठपर्वमात्रोऽ
वयवः सोवदातव्यः अन्यस्त्ववदेवस्यापादानभूतः । न च सावदातव्यः ।
33 स्विष्टकृदादिशेषकार्यार्थो न प्रधानयागार्थः । अतो नाशो हविः । यत्तु हविस्तद्विनष्टं । तद्विनाशे
वहविरंतरमेवोत्पाद्यं । यदावद्यवदानस्यैव यागार्थता । ततस्तद्विनाशेपि यागा
र्थताभावात् द्रव्यांतरं यागार्थमुत्पाद्यं । यदापि समस्तपुरोडाशसाध्यो यागस्तदापि द्व्यव
दाननाशे तस्य विकलत्वाद् विकलं हविरंतरमुत्पाद्यं । तस्मात्साधूक्तमवत्तनाशेन्यदिति । ३३
तदुक्तं । संस्काराणां पुरोडाशे द्व्यवदानं प्र[illegible]जकं । तद्विनाशाच्च न शेषात्तेनावदेयमत

स्वतः। गृहीतौ मध्यापूर्वयिष्ठौ तौ च नष्टावुभावपि। अतः शेषस्य शेषत्वात्प्रधानत्वं न युज्यते।
इति। अथेदं चिंत्यते इंद्राग्निसोमादिदेवतानां आहवनीयादीनामग्नीनां मंत्राणां इषे त्वेत्या
दीनां क्रियाणां अदृष्टार्थानां प्रयाजप्रोक्षणादीनां अस्मरणादिना अपचारे किं देवतात
रमन्यं तरं शाब्दांतरं वा प्रतिनिधेयमुत नेति। पूर्वेणान्यायेन प्रतिनिधौ प्राप्ते आह।।
न देवताग्निशब्दक्रियाः परार्थत्वात्। देवता अग्न्यादिका। अग्नय आहवनीयादयः। शाब्दो
मंत्रः। क्रिया प्रोक्षणप्रयाजादिका। अदृष्टार्था। दृष्टार्थेषु तु अवघातादिष्वस्त्येव प्रतिनिधिः
नखनिर्लुंछनादिनिरूपितकार्यसिद्धेः। तदेतेषां देवतादीनामस्मरणादिनापचारे प्रति
निधिर्न भवति कुतः। परार्थत्वात्। अदृष्टार्थत्वादित्यर्थः। प्रतिनियतानि ह्येषामदृष्टानि।
तथाहि। यत्र हि। प्रतिनिधीयमानं मुख्यस्य कार्यं साधयति तत्र प्रतिनिधिः। न चेह तथा
संभवति।। कामं देवतां योग्निशब्दः क्रियाः प्रतिनिधत्ते सकामं [illegible] पा देवतामपि प्रतिनिदध्यात्। अ
कामानु[illegible] मंतौ काममित्यमरः। अग्निशब्दक्रियाणामप्रतिनिधेयत्वस्य दृढीकरणार्थमिदं

सूत्रं। यतो देवतायाः प्रतिनिधिः सर्वथा न संभवति। न हि ऐंद्रे हविषि अग्निर्देवता भवति। न हि जा
त्या काचिद्देवतास्ति वैदिके कर्मणि। या यत्र विधीयते सा तत्र देवता। तेनान्यत्रान्या देव
तेव न भवति। अविहितत्वात्॥ प्रतिषिद्धं प्रत्यवायात्। नेत्यनुवर्तते। यत् द्रव्यं कोद्रवमाषबरटादि
प्रतिषिद्धं न तत्प्रतिनिधेयं। कुतः प्रत्यवायात्। यतः प्रतिषेधातिक्रमे प्रत्यवायो भवति। तथा हि अय
ज्ञिया वै कोद्रवा अयज्ञिया वै बरटकाः अयज्ञिया वै माषा इति प्रतिप्रतिषिद्धयज्ञसाधनभावा
34 माषादयः। अतो न माषादीनां प्रतिनिधित्वं। तदुक्तं। व्रीहिर्यवो वा श्यामाको नीवारो वा हविर्भवेत्।
वेणुयवा मसूरं वा शाकमूलं फलं जलं। सत्यं वा हविरेतेषु यथासंभवमाचरेत्। यद्वा व्रीहि
यवाभावे तुषतंडुलयोगिनीः। ओषधीः परिगृह्णीयादणुकोद्रववर्जिताः। ग्राम्याणां वा भावे ग्रा
म्यं आरण्यानामरण्यजं। यवाभावे कुगोधूमास्ततो वेणुयवा इति॥ अथेदं विचार्यते। प्रोषिते
कार्यं तिरन्या व्रते वा यजमाने तत्स्थाने किं याजमानपदार्थकरणाय पुरुषांतरं प्रतिनिधेयमु
त नेति। तत्र व्रीह्याद्यपचार इव प्रतिनिधौ प्राप्ते आह॥ स्वामी कर्मयोगात्। नेत्यनुवर्तते। ३४

स्वामीयजमानोनप्रतिनिधेयः।मृतस्य।कर्तुःफलंसिद्ध्यति।यदितुप्रतिनिहितोदक्षिणादानंद्रव्य
त्यागंवकरोतितदातस्यसम्यक्फलसंबंधान्मुख्यएवस्वामीस्यान्नप्रतिनिधिः।पत्नीनस्वत
न्त्र्यानग्निष्वमृतेपत्यौपुरुषांतरंप्रतिनिधायप्रयोक्ष्यतीत्यनाशंकनीयमेव।प्रोषितेऽन्यत्र
व्यापृतेवायजमानेयेतावत्कृच्छ्रपर्णाज्यावेक्षणादयः।तेषुयथासंख्यमध्वयदियएवकर्ता
रोविद्यंतेइतिनप्रतिनिधिनाकार्यौ।पुरुषसंस्काराणांचऋत्विग्वरणादीनांकृच्छ्रपर्वत्वात्वि
नापियजमानेननास्तिवैगुण्यं।पत्न्याअपितदनुष्ठानसंभवात्।यानिचब्रह्मचर्यादीनिफलं
प्रतियोग्यतायाःकारणानितानिबहिरवस्थितेनापियजमानेनक्रियमाणानिकृतोपकार
काण्येव।तस्माद्धेदबंधाज्यावेक्षणादावध्वर्य्वादिविद्यमानत्वात्इतरत्रब्रह्मचर्यादिसंभवा
त्प्रतिनिधेरनुपपन्नोयजमानप्रतिनिधिः।कुतः।फलयोगात्।नहिपुरुषांतरेणक्रियमाणा
निब्रह्मचर्यादीनियजमानस्यफलयोग्यतांसंपादयंतीत्यसंभवःप्र[…]त्नान[…]तिनिधेः

तस्मान्नप्रवासादितापचरिते स्वामिनि तत्स्थाने स्वाम्यंतरं प्रतिनिधेयमिति। ननु पत्न्यां
मृतायां किमस्ति प्रतिनिधिरुत नेति नायमस्याधिकारस्य विषयः। तत्रापि हि यदाता
वज्ञायापि पूर्वमारितपेरवाग्नीनां पुकर्मशीत्पर्यं पद्धः समाश्रीयते तदाग्न्यभावादेवाऽन
धिकारः सिद्धः। यदा तु नाग्नयः पन्त्यैदत्तास्तदाप्याचारप्रामाण्यान्नापत्नीकस्य दर्शपूर्ण
मासाद्यनुष्ठानं। अग्निहोत्रमात्रं तु वचनादनुष्ठीयते। तदाप्यपत्नीकोप्यग्निमाहरेदिति
वचनान्नास्ति पत्न्याः प्रतिनिधिरिति तत्त्वरत्ने॥ गुणेषु प्रतिनिधिः परार्थत्वात्। गुणेषु
क्रत्वर्थेषु गुणपदार्थेषु पात्रासादनाग्न्यन्वाधानवेदबंधनादिषु स्वामिनोपि प्रतिनिधि
र्भवति। यथा समाख्यमध्वर्यादिरेव तत्करोतीत्यर्थः। कुतः परार्थत्वात्। पात्रासादना ३५
दीनां क्रत्वर्थत्वात्। क्रत्वर्थानि ह्येयमादीनि नवपमानि दिवद्यजमानसंस्काराणि। अतः
परार्थत्वादेवमादिषु क्रत्वर्थेषु स्वामिनोपि प्रतिनिधिर्भवति। अप्येदं विचार्यते। सप्तदशा
वराश्चतुर्विंशतिपरमाः सत्रमासीरन्निति। तत्र [illegible]दशापञ्चरात्रिषु सत्रगणायागा।

यर्पंप्रवृत्तेषु यदा कश्चिन्म्रियेत तदा तस्थाने ऽन्यः प्रतिनिधेय उत नेति। तत्र पूर्वा
धिकरणन्यायेन स्वामिनः प्रतिनिधिर्न भवतीति प्राप्त आह॥ सत्रेषु तु श्रुतेः। उक्ता
र्थः पूर्वाधिकरणसिद्धान्तापवादमाह। सत्रेषु स्वाम्यपि प्रतिनिधीयते। यजमानस्या
पि प्रतिनिधिर्भवति। कुतः। श्रुतेः। अप्ययदि संदीक्षितानां प्रमीयेत तत्स्य यो
नेदिष्ठी स्यात्तमुपदीक्ष्य तेन सह यजेरन्निति श्रवणात्। तथा काम्यमपि यत्प्रा
रब्धं तदवश्यं समापनीयमित्युक्तं। आवश्यकत्वाच्च यथाशक्ति प्रयोक्तव्यं। अतो यद्यपि
घे यजमानास्ते ऋत्विज इति यजमानशब्दस्य स्वामित्वकर्तृवचनत्वात् एकशब्दो
पात्तायाः स्वामिकर्तृत्वयोः शाखिज्याद्देशेन विधिसंभवात्स्वामिभिरेवार्त्विज्यं कर्तव्यं।
स्वामिगता हि सप्तदशादिसंख्या तत्राङ्गं। तया तावद्वैगुण्यं। अतस्तत्संपादनाय
पुरुषान्तरं प्रतिनिधेयं। न तु स्वामिगता सप्तदशादिसंख्या। नवानीतः स्वामी। कथं
यो ह्यारभ्य समापयति तस्य सकलक्रतुः फलं भवति स च स्वामीत्युच्यते।

अप्ये दं विचार्यते। सत्रे यो यं प्रति निहितस्तत्फलयोग्यताहेतवो वपनाद्यं जनाद्यं जना
द्ययो यजमानधर्मा निर्भवंत्युत भवंतीति। तत्र स्वामिधर्मास्तांफलप्रतिग्रहणयोग्यत्वापादकत्वात्
प्रतिनिधेस्त्व फलप्रतिग्रहाभावात्स्वामिधर्मा न भवंतीति प्राप्तेऽप्याह॥ तत्तद्धर्मा कर्मयोगात्।
सत्सत्रे प्रतिनिहितानेदिष्ठी तद्धर्मास्स्वामिधर्मा भवति स्वामिनो धर्माः संस्कारा वपनादयस्ते
स्य भवंतीत्यर्थः। कुतः। कर्मयोगात्। स्वामिकर्मणा हि त्यागादि ना संप्रयुज्यते। अतस्तत्सं
36 स्कार सं स्कृते निवर्तककर्मानुष्ठानं युक्तं। यद्यप्यस्य फलाभावात् त्फलिनः संस्कारा
न प्राप्नुवंति। तथाप्यस्मिन् संस्कृते सत्यन्ये पायसाः सप्तदश यंत संस्कृतेषु सप्तदशसु स्थितं न
वति। ततः सप्तदशाऽवरास्सत्रमासीरन्नित्येतच्छास्त्रमनुगृहीतं भवति। अन्यथाऽसंस्कृताः षो
डशैवेति शास्त्रं बाध्येत। यदि बहूनां यजमानानामलाभाद वरा अल्पसंख्या यजमानाः स्यु
स्तदापि सप्तदशाः पेक्षिताः। ननु ततोऽप्यल्पसंख्या इत्यर्थः। अत इतरेषां फलप्राप्तिर्यथोपकर्त्तां 35
तकर्मानुष्ठानसाध्यत्वात् सप्तदशाकर्तृकस्य ब्रह्मवयादेः स्वकार्यं न सिद्ध्येत्। तस्मात्स्वामिधर्मा

नेदिष्ठा इति सिद्धं ॥ अथेदं विचार्यते। सत्रेषु किं त्रयाणामपि वर्णानामधिकारः उत ब्राह्म
णानामिति। तदर्थं चिकिं ये यजमानास्ते ऋत्विज इति यजनेनार्त्विज्यं यजमानसंस्कारत्वेन विधीयते उत य
जमानानामार्त्विज्यांगत्वेनेति। तत्र ऋद्धिकामादिवाक्येषु विशेषाश्रवणात् त्रिषु वर्णेषु प्राप्ते [illegible]षु यत्र
ब्देन तानुद्दिश्य तेषां संस्कारार्थमार्त्विज्यमुच्यते ये यजमाना ऋत्विज इति। अत्र यजमान[illegible] ऋत्विक्शब्दयोः
पृथगर्थत्वेन सिद्धयोः सामानाधिकरण्यानुपपत्त्येकेन लक्षणार्थेन भवितव्यं। तत्र मुख्यत्वा
द्यजमानशब्दः श्रुतिवृत्तः जघन्यत्वादृत्विक्शब्दो लक्षणार्थः। ये हि परार्थं प्रवृत्ता यजंत्यध्वर्य्वादय
स्तद्वाचकमृत्विक्पदमस्मिन्वाक्ये। तस्य स्वामित्ववचनेन यजमानपदेन स्य सामानाधिकरण्यासंभ
वात् कार्यलक्षणा भवति। ये परिक्रीतकर्तृकत्वेन प्रकृतितः प्राप्ताः पदार्थास्तेषु यजमा
नाः कर्त्तारः स्युरिति। न चैवमनृत्विक्कर्तृकत्वं शंकनीयं। यजमानानामेकैकस्यैकैकर्तृणां मुख्यत्वेनो
पपत्तेः। न हि वरणाभरणाजन्यमदृष्टमृत्विक्त्वं। आनमनार्थत्वाद्[illegible]रणाभरणयोः। अदृष्टा[illegible]र्थ्ये
चेदुसम्भृदुयाज्यावरणवत् सत्रेऽपि वरणाभरणे कर्तव्ये स्यातां। तस्माद्वरणाभरणे नि
तमृत्विक्त्वं। किंतु ऋदुयजननिमित्तं। अतः [illegible] स्तद्द्विशेषापाच्याध्वर्य्वाद्यः संत्येव।

तेनु यजमाना एव। नान्ये। वचनेन हि परकर्तृकत्वेन प्राप्तानां पदार्थानां यजमानकर्तृकत्व
विधीयते। युक्तं च तदृद्धौ यथाश्रुतमुद्देशप्रतिनिर्देशकोऽइति स्थिते को वाक्यार्थ इति विं तेर
त्यते। तत्र सर्ववर्णानां यजमानानामुद्दिष्टप्रतिनिर्दिष्टानां मार्त्विज्यं संस्कारत्वेन विधीयते।
प्रधानत्वमुद्देश्यं भवति यद्युक्तमस्य यजमानोद्देश्यत्वाइति तेषामेव प्राधान्यं। तेन य
37 थाब्राह्मणानां यजमानानामेव सतां वचनप्रामाण्यादार्त्विज्यं एवमितरयोरपि वर्णयोः। प्रधा
नभूतैरेव यजमानैः क्रियमाणमार्त्विज्यं न गुणभूतत्वात् कर्तृत्वं न पेक्षते। गुणकर्तृपरिच्छे
देन ब्राह्मणयमार्त्विज्याङ्गं तदभावे तदपि द्वारा भावान्न सत्रे प्राप्नोति। तस्मात्त्रयाणाम
धिकार इति पूर्वः पक्षः। सिद्धान्तमाह। सत्राणि ब्राह्मणानामार्त्विज्यश्रुतेः। सत्राणि द्वादशा
हादीनि ब्राह्मणानामेव भवन्ति न क्षत्रियवैश्ययोः। कुतः। आर्त्विज्यश्रुतेः। ये यजमानास्त
ऋत्विज इति श्रवणात्। यद्यप्यत्र सर्ववर्णा उद्दिष्टप्रतिनिर्दिष्टाः। विशेषश्रवणात् तथाप्या ३७
र्त्विज्यं यजमानानां संस्कारत्वेन न विधीयते तथा सत्यार्त्विज्यस्याप्राकृतकार्यप्रसंगात्। तेन

पक्षद्वयोऽपि प्रायेण यजमाना उद्दिश्य उद्दिश्यंते। किंतु स्वविकल्पादेन तत्कर्तृकान्यदा प्राप्तानुद्दिश्य
यजमानाः कर्तृत्वेन विधीयंते। प्रत्याम्नानन्यायस्य ऋत्विजो निवर्तंते। आर्त्विज्यं ह्यत्र प्रधानं। त
स्य चात्र द्वौ धर्मौ अंगत्वेन प्रकृतितः प्राप्तौ अन्याकर्तृकता ब्राह्मणकर्तृकता च। तत्रान्यक
र्तृकताये यजमानास्ते स्वर्त्विज इत्यनेन बाधिता। ब्राह्मणकर्तृकतायास्तु न। किंचिद्बाधक
नास्ति स्वर्द्धिकानादिशब्दानां ब्राह्मणाविरोधात् तस्मात्प्रकृतितः प्राप्तं ब्राह्मणकर्तृकत्वं।
वावनिकं व यजमानकर्तृकत्वमनुनयं संपादयितुं ब्राह्मणानामेव सत्रात्तिर्भवंतीति
सिद्धं।। अथेदमपरं चिंत्यते। प्रयाजेषु पुरूपन्नेदे नानुष्ठाने विशेषोऽस्ति। राजन्यव
सिष्ठादीनां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषां। तत्र वसिष्ठा त्रिवध्य्यश्च
शुनककण्वकश्यपसंकृतिगोत्रोत्पन्ना रस्ततो प्रवरवंतो वा नराशंसप्रयाजवंतः
इतरे च तनूनपात्प्रयाजवंतः। त एते भिन्नकल्पा अपि मिलित्वा सप्तदशावराः संभू
यसत्रेऽधिकारिणो भवंति उत समानकल्पा एवेति। तदपीमिदं विचार्यते। किं वसिष्ठादयो नाराशंसा
द्यंगचेकतरो विधीयंते उत वसिष्ठादीनुद्दिश्य नाराशंसादि तादर्थ्येन विधीयत इति। तत्र वासिष्ठाद्यर्थ्यं

त्वेन विधाने फलकल्पनात्प्रकरणबाधाच्च वसिष्ठादय एव नाराशंसाद्यंगत्वेन विधीयंते। षष्ठी च संबंध
वाचिनी। सत्रेषु च सत्रिणांप्रत्येकमेव कर्तृत्वमिति स्थितं। अतस्तत्र वसिष्ठा वसिष्ठैः क्रियमाणो नराशंसो
वसिष्ठेनापि तावत्क्रियत एवेत्यविगुणस्तेषां तनूनपादप्यन्येः। अतोयं। कं विकल्पमाश्रित्य भिन्नकल्पा
नप्यधिक्रियेरन्नित्येवं प्राप्तेऽभिधीयते॥ एककल्पानामविगुणत्वात्। एकः समानः तुल्यः कल्पः पक्षो ये
षां ते एककल्पाः तेषामेव सत्राणि भवंति। न भिन्नकल्पानां। कुतः अविगुणत्वात्। यदि सर्वेपि नराशंस
प्रयाजवंतः अप्यवा सर्वेपि तनूनपात्प्रयाजवंतः। तदिवाङ्गुण्यं न भवति अविगुणत्वाच्च फलसिद्धिर्भव
38 ति। इतरथा भिन्नकल्पेषु सह निविष्टेष्वन्यतरप्रयाजाप्रवणे सत्यन्येषां विगुणत्वात्फलं न सिध्येत्। वे६
न च वचनबलेन बाधः। वचनस्य समानकल्पेषु चरितार्थत्वेन बाधकत्वासंभवात्। अत्र वसिष्ठादी
स्वामित्वेनोद्दिश्य तादर्थ्येन नराशंसादि विधीयते। तादर्थ्यं च क्रतूपकारद्वारेणाप्युपपन्नमिति न भिन्न
कल्पनापत्तिः। वसिष्ठानामिति षष्ठी स्वामिलक्षणा। अतो येषां स्वं नराशंसः तेषामेव कर्मसिद्धिं करोति न९
नेतरेषां। अयमर्थः। वसिष्ठानां नराशंस एव यज्ञं गतः युक्त एव क्रतुः फलसिद्ध्योपयोगी भवतीति।
एवं तनूनपाद्युक्त एवेतरेषां। अत एककल्पानामेव सहाधिकारो न भिन्नकल्पानामिति सिद्धं। ३८॥

अत्रसत्रव्यतिरिक्तान्यथानेककर्तृकाणां द्विपरुगणयज्ञादीन्युदाहरणानि न भवंत्येव। तुल्यन्यायात्।
प्रदर्शनार्थं तु सत्रग्रहणमनुवृत्तिः प्रदर्शिता। अत्र विशेषः। वासिष्ठो ब्रह्मेति वचनात् ब्रह्मत्वं वासिष्ठे
न कर्तव्यं। विश्वामित्रो होतेति वचनात्। होत्रं तु विश्वामित्रेण। तयोश्च भिन्नकल्पत्वान्न सहाधि
कारसंभवः। तस्माद् दूरं गत्वा वा द्वासिष्ठं ब्राह्मणमाश्रित्य होत्रस्य विश्वामित्र कर्तृकतां बाधित्वा वा
सिष्ठेन तत्समानकल्पेनेन वा केन चित्कर्तव्यं। विश्वामित्रं वा होत्रमंगीकृत्य ब्रह्मत्वमपि वासि
ष्ठत्वबाधेन विश्वामित्रेण तत्समानकल्पेन वा केन चित्कर्तव्यं। अथवा ब्राह्मणमात्रस्याधिकार इति। तत्रा
विशेषात्सर्वेषामधिकारः स्यात्। अथवा वासिष्ठो ब्रह्मेति प्रकृतौ वचनात् ब्रह्मत्वस्याविगुणतायै वरं
वासिष्ठेन भवितव्यं। अतस्तत्समानकल्पानामधिकारः। सिद्धांतस्तु। ये एव कश्चित्स्तोमभागानन
धीते स वासिष्ठ इति वचनात्स्तोमभागाध्ययनवतोऽवासिष्ठस्यापि ब्रह्मत्वस्यानुज्ञानाद् वासिष्ठेना
पि क्रियमाणं ब्रह्मत्वं विगुणं न भवति। विश्वामित्रेति वचनात् होत्रं विश्वामित्रेण विना विगुणं
स्यात्। तस्माद्विश्वामित्रतत्समानकल्पानामेव सत्रेऽधिकारो नान्येषामिति सिद्धं। अनेनैव न्या
येन तुल्यप्रमाणानामेव सत्राणि प्राप्नुवंति न भिन्नप्रमाणानां दीर्घह्रस्वानां। कुतः। एवं हि श्रूयते।

यजमानेन संमितौदुंबरी कार्येति यजमानेनोर्द्ध्वबाहुप्रपदोच्छ्रितेन सम स्थितेनवा द्विपुरु पा० ८ः रज्जुं
२ दुं मिचेति तत्र येन यजमानेन संमितौदुंबरी न क्रियते। आग्निहोत्रसाधनापीरज्जुर्वा येन संमिता
न क्रियते तस्यावैगुण्यं भवतीत्याशंक्याह॥ न परार्थ्यत्वात्। तुल्यप्रमाणानामेव सत्रेउदि
कारेण न विद्यतीति यदाशंकितं। तन्न कुतः परार्थत्वात्। परार्थ्यो ह्यत्र यजमानः। अदुंबर्या
दिमानार्थे गुणाः भूतः प्रो तो येन केन चिद्यजमानेन संमिता सती यजमानप्रमाणा भवती
वेति भिन्नप्रमाणानामप्यधिकार इति सिद्धं। अतः शालाग्नेरवरेष्टकायूपादिप्रमाणानियमः
कश्चिद्यजमानस्यारत्न्यादिना कार्याणि। न चैवमग्नीनामपि परार्थ्यत्वाद्यस्य कस्य चिदग्निषु साधितं
कर्मस र्वेषां फ लस्य साधकं न विद्यतीत्यनाहिताग्नीनामप्यधिकारः सत्रेषु भवतीति
प्राप्तेउच्यते। दर्शपूर्णमासा भ्यामिष्ट्वा सोमेन यजेतेत्यस्य प्रकृतितः प्राप्ते य एतेनानि
ष्ट्वेति वचनाद कृतदर्शपूर्णमासस्य ज्योतिष्टोमानां अनाहिताग्नीनां नास्ति सत्रेष्वधिकारः। तथा च
नयोपाधानगतादात्मने पदादनाधानस्य च्युणां न कार्यसिद्धिः पयाप्नुवंतीत्यनाहिताग्नीनमन ३९

२ कुं

धिकारः । आदधीतेत्यात्मनेपदाद्विगाधातुरेवाधानैकफलेन भवितव्यं । कर्मयोग्यतावाग्नीनां तत्फलं ।
अतोऽन्येनाहिताग्नयोऽन्यस्य कर्म न साधयंति । यजमानेन संमितौदुंबरी कार्येति दुश्शास्त्रात्पर्येऽपि येन केन
चिदपि प्रयोगगतेन यजमानेन संपाद्यत इति वैषम्यं । ननु तर्हि जुह्वादिपात्रेषु कल्प्यं । तानि किं यस्य
चिद्यजमानस्य संबंधीनि सत्रे उपादेयानि । अथ वा साधारणान्यन्यान्येवेति । तत्राग्निवदात्मनेप
दस्तत्र विशेषविरोधाभावात्प्रत्येकस्यापि पात्राण्युपादेयानीति प्राप्ते उच्यते । सत्यं नयं विरो
धो नास्ति । तथापि आहिताग्निमग्निभिर्दहंति यज्ञपात्रैश्चेति तथा दक्षिणाहस्ते जुहूं सादयतीत्या
दिवचनैः पात्राणां दाहे करणभावः सादनप्रतिपत्तिर्विधीयते । तत्र यदि कस्यचिद्यजमानस्य पात्रैः
सत्रमारभ्यते तदा मरणस्यानियतकालत्वात्कदाचित्प्रयोगमध्ये एव तस्य यजमानस्य मरणं
स्यात् । ततस्तस्य संस्कारः पात्राणां च प्रतिपत्तिर्हीयते । यदि तु तैर्दह्यते प्रक्रांतः प्रयोगो विगुणः
स्यात् । तस्मात्साधारणानि पात्राण्युत्पाद्य सत्रं कार्यं । इदमिदानीं चिंत्यते । आर्त्विज्यविरोधेन क्षत्रि
यवैश्ययोः सत्रेऽनधिकार उक्तः सत्राणि ब्राह्मणानां स्युर्ऋत्विक्प्रतिषेधादिति । तर्हि आर्त्विज्ये तयो

रधिकारोमास्तु।गार्हपतेधिकारोभविष्यतितत्राक्रियाविरोधाभावादित्याशंक्याह।। वैश्यराजन्य
योर्गार्हपते।नेत्यनुवर्तते।वैश्यराजन्ययोर्गार्हपतेपिगृहपतित्वेपिअधिकारोनभवति।कुतः।
तयोर्ब्रह्मसामपक्षे भेदेन भिन्नकल्पत्वात् तन्नूनपात् नराशंसयाजिवत्।तथाहि।बार्हद्गिरं ब्रा
ह्मणस्यब्रह्मसामकुर्यात् पार्थुरश्मंराजन्यस्य रायोवाजीयंवैश्यस्येति।तेनपार्थुरश्मे रायो
वाजीये वाक्रियमाणे ब्राह्मणानांवैगुण्यं भवति।बार्हद्गिरेनुक्रियमाणेक्षत्रियवैश्ययोः।तस्मा
40 द्विरपक्षत्वे यथोर्गृहपतित्वेपिनाधिकारः।इदं श्रूयते।पंचपंचाशतस्त्रिवृतः संवत्सराः पंचपंचा
शतःपंचदशाः पंचपंचाशतःसप्तदशाः पंचपंचाशतएकविंशा।विश्वसृजांसहस्रसंवत्सरमिति।
तत्रायंसंदेहः।किमयंसहस्रसंवत्सरशब्दोमुख्य उत गौणः।यदापिमुख्यस्तदापिकिं
मनुष्यव्यतिरिक्तानांस्वतः सहस्रायुषांगंधर्वादीनामधिकारः।उतमनुष्याणामेव रसा
यनमित्रविंदादिसंपादितसहस्रायुषां।अथवाऽन्यकल्पः।अथवासाम्युक्तानां।अथवा
विश्वसृजामयनंकुर्वतांसहस्रायुष्ट्वं।अथवाऽतीपरातानांयजमानानामधिकारः। ४०

यद्यपि गोसावं तदापि किं मासेषु संवत्सरत्वाद्वा तद्द्वादशरात्रिषु त दिवसेष्विति पक्षाः। तत्र प्रथमं पक्षं ता
वदाह॥ सहस्रसंवत्सरममनुष्याणामसंभवात्। सहस्रसंवत्सरं सत्रं अमनुष्याणां मनुष्यव्यतिरिक्ता
नां स्वर्गनावा सहस्रायुषां सिद्धं गंधर्वादीनां भवति। कुतः असंभवात्। मनुष्याणां सहस्रायुष्ट्वस्यासं
भवात्। नहि सहस्रायुषो मनुष्याः संति। अतः श्रुतिबलाद् मनुष्याणां गंधर्वादीनामधिकारः॥ स्या
न द्देहानित्यत्वात्। अमनुष्याणामधिकारस्य प्रागुक्तत्वाद्द्वसंते ब्राह्मणोऽग्नीनादधीतेत्यादिविधानान्मनु
ष्याणामेवाहवनीयाद्यग्नयः संति नान्येषामिति न कल्पमपि गंधर्वादीनामधिकारः संभवति। अतो म
नुष्याणामेव सहस्रसंवत्सरं सत्रं स्यात्। कात्स्न्येन यद्यो दितं विधिमुपसंहर्तुं तेषामेव शास्त्रत्वात्। ननु म
नुष्याणां सहस्रसंवत्सरपरिमाणमायुः कथं संभवति। उच्यते आयुरपि तावत्परिमाणं मनुष्याणां
स्यात्। कुतः। देहानित्यत्वात्। देहस्यायुषो नित्यत्वात्। अनियतकालत्वात्। नहि नियतकालं मनुष्यदे
ष्य हावस्थानं। कश्चिच्छतं वर्षाणि जीवति। कश्चिदधिकं। कश्चिदधिकतरमिति। अतोऽपरिमितायुषो मनु
ष्या इति। तस्मान्मनुष्याणामेवाधिकारः। ननु मनुदेहस्यानित्येऽपि सहस्रायुष्ट्वं तेषां कथं संभवति। त्याशंक्याह।

तस्यैव कार्यत्वात्। तस्यैवायुषः कार्यत्वात्। रसायनमित्रविंदादिना कर्तुं शक्यत्वात्। श्रूयते हि। मित्रविंदाय
आयुःकामो यजेतेति। अतो रसायनैर्मित्रविंदादिभिरायुःप्रापकैः कर्मभिश्च मनुष्याणामपि दीर्घ
मायुः प्राप्स्यतीत्याशंक्याह॥ नासंभवात्। रसायनैरपि एतावत्परिमाणमायुर्न संभवति।
न च मित्रविंदादिकर्मभिरपि। न ह्येतावदायुषो रसायनादीनां च संबंधो दृष्टपूर्वः। न हि रसा
यनानामेतावत्सामर्थ्यं दृष्टं यत्तैः सहस्रं वर्षाणि मनुष्या जीवेयुः। एतानि ह्यायुषो वर्द्धनानि
वलीपलितनाशनानि स्वरवर्णप्रसाधकानि च। नैतावत्परिमाणस्यायुषो दायकानि दृश्यंते।
न च मनुष्याणामेतावदायुः कल्पयितुं शक्यते। शतायुर्वै पुरुष इत्यपवादात्। ननु शतानि ज्यायूं
षि यस्येति विग्रहः करिष्यते। मैवं। न हि द्विवचनबहुवचनांतानां समास इष्यते प्रमाणाभावात्।
अभिधानासामर्थ्याच्च। नन्वेवमेकवचेपि प्रमाणाभावात्तेन कथं विग्रहः क्रियते। एकत्वं जात्यपेक्षं
प्रातिपदिकाभिहिता जातिरेकेति। यद्वा जातिराश्रयमंतरेणानुपपद्यमाना एकं तावदाश्रयमा
क्षिपतीत्येकवचसिद्धिः। तस्मान्मनुष्याणां रसायनमित्रविंदादिभिस्सहस्रसंवत्सरायुष्ट्वस्यका

रणासंभवाद्रूपं मनुष्याणामधिकार इत्याशंक्याह॥ शास्त्रसंभवादिति भारद्वाजः। भारद्वा
जो मुनिरित्याह एवं ब्रवीति। मनुष्याणामपि सहस्रायुष्ट्वं संभवति। कुतः शास्त्रसंभवात्। शास्त्र
संभवः शास्त्रसंभवः तस्मात्। मित्रविंदायागमायुःकामो यजेतेति हि शास्त्रं मित्रविंदयागमायुर्जीव
येदिति बोधयति। न चैतत्रायुषः परिमाणं श्रूयते। तेन केचित्कर्माभ्यासेन सहस्रायुषोऽपि भ
विष्यंतीति। रसायनान्यल्पस्य स्थिरत्वावश्यकारकाणि दृश्यंते। एवमभ्यस्यमानानि वीर्यवत्तमा
नि वयःस्थिरशरीरतामुत्पादयिष्यंति। शतायुर्वै पुरुष इत्यस्मिन्सत्यपि अधिकजीवनं मनुष्येषु
रूपप्रदेशानुभूयत एवेति नायमेकांतः। तस्मान्मनुष्याणामपि रसायनैर्मित्रविंदादि शास्त्र
सहस्रसंवत्सरविषयकशास्त्राच्च सहस्रायुष्ट्वस्य संभवो भविष्यतीति प्राप्तेऽत्राह॥ नादर्शनात्।
शास्त्रसंभवादिति यदुक्तं तन्न। न हि मित्रविंदयासहस्रसंवत्सरपरिमाणमायुर्भवतीति श्रू
यते नाप्यभ्यासेन तावद्वक्तुं शक्यते। नापि रसायनैः। कुतः अदर्शनात्। तावदायुष्काणां मनुष्या
णामदर्शनात्। यद्वा निरूपाय्ये रेतावदायुर्भवेत्। तर्हि आयुषः सर्वैरपि इष्यमाणत्वादेतदुपा

संपादितेतावदायुषो मनुष्याद्दृश्येरन्। नवदृश्यंते। अतएवमकामयते। एभिरभ्युपायैरेतावदायुर्भ
वतीति। नाह्येतावदायुः कस्य विदपि संभवति। तत्र रसस्यैतावदारोग्यपुष्ट्यादिजनकत्व
मेवाभ्यायुर्हेतुत्वं। आयुःप्रापकैरन्यैर्मित्रविंदादिभिरपमृत्युनिरासएवक्रियते। न विधातृ
सृष्टादधिकमायुः। तथाच मित्रविंदांप्रकृत्य वाक्यशेषः [redacted]
विंदते मित्रं राष्ट्रमस्य भवति। अपपुनर्मृत्युं जयति सर्वमायुरेतीति। नचापमृत्युनास्तीति
वाच्यं। अपमृत्युरपि श्रूयते। एकशतमपमृत्यूनामिति। तेनैको महामृत्युस्तदुल्लंघ
नं केनाप्युपायेन कर्तुं न शक्यते। तथाच मत्स्याः पितरः पुत्रा ह्यायुषो म्रियते यस्तद्वि
धत्त इति परमायुषः पूर्वमपमृत्युना मरणं दर्शयतीति। तथाच मनुरपि अमुमर्थं ब्रवीति। अ
नभ्यासेन वेदानामाचारस्य च लंघनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसतीति।
अतो मनुष्याणां रूपमपि सहस्रायुष्ट्वस्यासंभवादेकस्मिन्कुले समुत्पन्नानां
पितृपुत्रपौत्रतत्प्रपौत्रतत्पुत्रादीनां बहूनां साधारणस्य सहस्रायुष्ट्वस्यासंभवा

कुलाधिकारइतितृतीयःपक्षोस्त्वित्याह॥ कुलसत्रमितिकाक्षीजिनिः।काक्षीजि
निमुनिरित्याहएवंकल्पयतियकुलसत्रमेतत्सहस्रसंवत्सरंभवतिकुलस्यपितृपुत्र
पौत्रप्रपौत्रतत्पुत्रादिरूपस्यवंशस्यैतद्भवतिनत्वेकस्यकस्यचिदसंभवात्।म
नुष्याधिकारंचैतत्।प्रारब्धंचावश्यंसमापनीयं।नचैकःशक्नोतिसमापयितुमिति
यच्याशक्यते।तथासमापनीयमितिगम्यमानेबहवस्तेशक्नुवंतितेनतत्कुली
नाःक्रमेणकेचिदारब्धंकेचिन्म●ध्येनुष्ठितं।कविसमापयिष्यंतिइत्येवंकुल
सत्रंकाक्षीजिनिर्मन्यतेस्म।नैतद्युक्तं।यतःशास्त्रफलंप्रयोक्तरीतिन्यायात्समयानु
ष्ठातॄणामेवफलंभवतिनैकदेशानुष्ठातॄणां।नचपितृपुत्रादिष्वेकोपिकृत्स्नंकरो
ति।तस्मान्नास्त्येवकस्यापिफलमिति।अतोनकुलसत्रमेततार।तर्हिसाम्युत्थानमि
स्त्वितिचतुर्थःपक्षोस्त्वित्याह॥साम्युत्थानमितिलौगाक्षिः।सामिशब्दोर्द्धशब्दस्यार्थे।अर्द्ध
समाप्तेसत्रेउत्थानंपरित्यागःसाम्युत्थानं।सामित्वर्द्धेजुगुप्सितइत्यमरः।असमाप्तमेव

43

इदं सत्रं त्याज्यमिति पूर्वः। लोगाक्षिर्मुनिरेवं मन्यते स्म। कार्ष्णाजिन्यभिमता कुलं सत्रपक्षा स्नान्मुख्या
नं वर मिति। तन्मते हि बहूनां पापप्रघासः। अस्मन्मते वा रं भकर्तृणामेवेति। अस्य पक्षस्य तद
पेक्षयोत्कृष्टता। वस्तुतस्त्वयमपि पक्षो नुपपद्यत एव। आसमाप्तात्कर्मणः फलानुत्पत्तेः। तर्हि
सत्रविधायकवचनबलादेव सत्रिणां दीर्घायुर्भविष्यतीति पंचमः पक्षोस्तु। मैवं। नह्यस्य व
चनस्य सोर्थः संभवति तद्वाचकपदाभावात्। न च कल्पयितुं शक्यते। संभाविता युष्काणा
[illegible]मपि सत्रांतरेषु प्रवृत्तानां देवान्म्रियमाणानां तत्सत्रविधिवचनादायुर्वृद्ध्यदर्शनात्। तर्हि
पंचपंचाशत इत्यस्य पुरुषपरत्वं अंगीकृत्य सार्द्धद्विशतानां पुरुषाणामधिकारे त्रिहिते
संवत्सरचतुष्टयेन सत्रस्य सहस्रसंवत्सरत्वं संपद्यते। यत एकोपि त्रिवृत्स्तोमक्रयाजय
ति तथा पंचद[illegible]शादयोपीति। तेन चतुरः संवत्सरमिदं सत्रमर्हंतीत्यपि यजमानशतेः
क्रियमाणां सहस्रसंवत्सरं भवतीति षष्ठः पक्षोस्तु। सोप्यनुपपन्नः। चतुर्विंशतिपरमाः ४३
सत्रमासीरन्निति वचनादधिकानां तत्राधिकाराभावात्। तस्मात्संख्याशाद्वसंवत्सरशा

द्वयोर्मध्ये ऽन्यतरस्य गौणत्वमाश्रित्य मनुष्याधिकारत्वमाश्रयणीयः। तत्रापि संख्याश
ब्दस्य मुख्यत्वादेकार्थनिश्चयसामर्थ्याभावः स्यात्परित्यागः। संवत्सरपदं तु उञ्छ घन्यत्वात् सं
4 वत्सरो रवाँ इन्द्र न खत्राघ्नेकार्थसाधारणत्वेनार्थनिश्चयासामर्थ्याद्गौणं भवति। तर्हि यो मासः
स संवत्सर इति वचनात् संवत्सरशब्दस्य मासपरत्वेऽस्तु सहस्रमासं पतस्त्र मित्यनेन सप्तमः प
क्षोऽस्तु। सोऽपि नोपपद्यते। अतः अष्टमे वर्षे उपनीतो द्वादशवर्षाणि वेदमधीत्य विंशतिवयस्को वि
वाहं कृत्वा जातपुत्रोऽग्नीनादधीत तस्मादाधानादूर्ध्वं ज्योतिष्टोमानुष्ठानोत्तरकालमस्यायुषि न स
म्भवन्ति सहस्रमासाः। तर्हि संवत्सरप्रतिमा वै द्वादशरात्रय इति प्रयोगाद् द्वादशरात्रिषु संवत्सर
शब्दः। प्रतिमाविशेषणं च तत्र संवत्सरशब्दः न तस्य द्वादशरात्रिषु प्रयोगः। तस्मादष्टमपक्षोऽपि
अयुक्तः। अप्यनमं पक्षं सिद्धान्तमाह॥ अशक्यत्वाद्वा शक्यत्वात्। वा शब्दो ऽवधारणे। अशक्यमेवैतत्स
हस्रं प्रव्यां। न वर्षाणां न मासानां नापि द्वादशरात्रीणामिति। कुतः अशक्यत्वात्। न ह्यन्यत्वे त
सत्रं मनुष्यैः कर्तुं शक्यते। अपवाशक्यत्वात्। अशक्यसंवत्सरशब्देन प्रतिपादनमनुरण्पर
विकर्तुं शक्यत्वात्। मुख्यार्थासंभवे गौणी वृत्तिराश्रीयते एव। अनन्यपानर्थक्यापत्तेः। नन

त्रमुख्यार्थः संभवतीति प्रागुक्तं । अतोऽयमपभ्रंशा विदितो । अत्र च दिवसपरत्वं युक्तं । त्रिंशद्
दिशाब्दानुगुण्यात् । तत्रिंशत्वं च दशाः सप्तदशाइत्येते शब्दाः स्तोमवाचकाः । संख्याः स्तोमयु
44 क एकस्मिन्नहनि यागरूपलक्षणपरा वर्तते । तत्रैषु तप्ताविधप्रयोगवाक्ये तुल्यत्वात्
न च हः संख्येक्वचिदपि त्रिंशदादिशाब्दाः प्रयुक्ताः । तेष्वेशाब्दैः समानाधिकरण्यात् संवत्स
रशब्दः स्वावयवभूतेष्वहःनिलक्षणया वर्तते । त्रिंशतः संवत्सराइत्युक्ते त्रिंशत्स्तोमकयाग
युक्तान्यहानीत्युक्तं भवति । ननु संवत्सरशब्दस्याहःनिवृत्तौ किं प्रमाणमित्यत आह
श्रुतिसामर्थ्यात् । अहन्यपि संवत्सरशब्दस्यार्थवादोदितं प्रवृत्तिनिमित्तमस्त्येव
यते हि गमादित्यस्यैव संवत्सरस्तत्रोपादेवोदेत्यप्यव संतोयदा संगवोप...
ष्मोयदामध्यं दिनोप्यवर्षापि दापराह्णोप्यशरारद्यादेवास्तमेत्यप्यहेमंत इति
सर्वर्तुसमवायात्कृत्यतेदिवसः संवत्सरशब्देनाभिधातुं । अहरेव संवत्सरइत्यपि ४४

॥
कश्चित्सूयते। अतः श्रुतिसामर्थ्यादितकृतिबलात्संवत्सरस्याहोत्राण्यपहृत्य धर्मयक इत्यपर्थः। तस्मा
दह्नां सहस्रमेतदवसेयं। किंच॥ प्रकृत्यनुग्रहाच्च। प्रकृतेर्गवामयनस्याहर्गणादेरेवमनुग्रहः कृतो
भवति। प्रकृतौ हि अहान्येव संख्येयानि। इहापि यद्यहान्येव तत्प्राप्नुवंति तर्हि प्रकृतिरनुगृही
ता भवति नान्यथा। तस्मात्सहस्रदिनात्मकमेतद्धि द्वादशाहमयनसंज्ञकं सत्रं मनुष्याणामेव
भवतीति सिद्धांतः। अथेदं विचार्यते। एकप्रयोगवचनेनोदितानामेकफलानां संहत्यकारित्वं ब
हूनां कर्मणां सहत्वेनांगानामंगानुष्ठानं किं तंत्रेण भवति उत पृथगिति। तत्र तदर्थं प्रथमं संहत्यका
रित्वं प्रतिपाद्यते। यदि ह्याग्नेयादयः षडपि परस्परानपेक्षाः स्वर्गं साधयेयुः ततस्तेषां कामिनः
कर्तव्यत्वेन युगपदुपस्थाना नाभावात्पृथगेव स्वांगयुक्ताः कर्तव्या इति तंत्रत्वं न सिध्येत्। तस्मा
त्संहत्यकारित्वं प्रतिपाद्यते। तत्र दर्शपूर्णमासादिष्वनेकप्रधानस्य संनिपातसंदेहो भवति। कि
माग्नेयादयः पृथक्पृथक्स्वर्गं साधयंति उत संहत्येति। तत्राग्नेयादीनि प्रधानानि परस्परा
न नपेक्षाणि निष्पादनेनानिः पृथग्भूतान्युत्पन्नानि पृथगेव फलमाकांक्षंतीति ततस्तेषां संनिधाने
स्वर्गादिफलं श्रूयमाणं नेदेनाकांक्षितत्वादिदं निबध्यते। तस्मात्प्रतिप्रधानं फ

...न्नेदेशाप्तेउच्यते। पृथक्प्रसूतानामप्येतेषामेकमेव फलं कुतः। यतो दर्शपूर्णमा
साभ्यां स्वर्गकामो यजेतेत्यनेन वाक्येन समस्तेभ्य एकं दर्शपूर्णमाससं
ज्ञकेनोपादयते तेषां फलसंबंधः कृतः। अतः समुदितेभ्यः फलं गम्यते न
45 नेदेनाप्येषां ग्रामेणाकूपः खेयो ग्रामेणात्तडागः खेय इति ग्रामशब्देन
समुदायवचनेन संपुज्य विधीयमानः कूपः। समुदितैः पुरुषैरेकः खे
न्यते न प्रतिपुरुषं कूपभेदः एवमिहापि। नात्र यागमुद्दिश्य फलं
विधीयते स्वर्गेण यागं कुर्यादिति भावना। साध्यसाध्यसाधनांशयुक्ता
उत्पत्तिप्रयोगवाक्याभ्यामवगताः परस्परानपेक्षा एव कल्पमितीकर्त्तव्यता
वं नेदे निवापद्धं तेते शाद्यसंनिधिसमाम्नातान्यंगानि प्रत्येकमेव तास्तु विनियु
ज्यंते। विनियोगानुसारेणैवानुष्ठानं। तस्मादेकैकं स्वाङ्गयुक्तं कर्तव्यमित्ये
कं साङ्गं कृत्वा परमपि तथैव कर्तव्यं। तस्मात्प्रतिप्रधानं पृथक्प्रयोगे वाङ्गानुष्ठानं कार्यं ४५

मितिप्राप्तेऽभाह॥ ६॥ कर्मणां युगपद्भावस्तन्त्रं। यत्र प्रधानकर्मणां युगपद्भावः
सहप्रयोगः तत्रारादुपकारकाणामङ्गानां तन्त्रं सकृदनुष्ठानं भवति। न प्रतिप्रधानं
पृथक् पृथक्। यद्धि सकृत् कृतं बहूनामुपकरोति तत्तन्त्रमित्युच्यते। यथा बहूनां म
ध्ये कृतः कृतः प्रदीपः। कुतस्तन्त्रमिति हेत्वाकाङ्क्षायां त्रीन् हेतूनाह॥ शक्यपुरुषार्थ
कृतार्थैकार्थसमवायश्रुतिभ्यः। प्रधानकर्मणां सहप्रयोगे सति यदङ्गानां सकृ
दनुष्ठानमयुक्तं। तत् कुतः शक्यत्वात्। सकृदप्यनुष्ठितैरारादुपकारकैरङ्गैर्बहूनाम
पि प्रधानानामुपकारस्य कर्तुं शक्यत्वात्। शक्नुवन्ति ह्यारादुपकारकाणि बहूनामु
पकर्तुं अग्रहणमात्रविशेषत्वात् प्रदीपवत्। यथा एक एव प्रदीपो बहूनां मध्ये कृतः स
सर्वेषामुपकरोति। एवमेतान्यपीति। यद्यप्यङ्गानां प्रत्येकमेव विनियोगस्तथापि वि
धानवदनुष्ठानं सकृदेवोपकारकं भवति यथापि वहि पद्मनावनासु नेदानेव कल्प्यं ना
वमपेक्षमाणाश्च पि सकृदाम्नाताः एवाङ्गविधयः प्रधानमपि प्रत्येकमङ्गानि समर्पय

46 तत्रापिपूर्वकस्यचित्प्रधानोत्पत्तिविधेः संनिधानैप्रकरणावशेनसंनिधिबाध्यते।त
थैवच बहूनांसंहतानांप्रधानानांफलस्यसाधनत्वाकरदेशकालैक्याद्युगपत्सर्वे
ष्वनुष्ठानंप्रारब्धेषु कृतनूकृतमेवांगंसर्वविपर्यासकृतंवासंतमपिकेनचि
त्संनिधिंबाधित्वाप्रकरणवशेनसर्वार्थंभवति।किंचपौर्णमास्यांपौर्णमास्यायजेतेत्य
स्यानांयुगपदनुष्ठानंभवगतंपृथक्पृथक्स्वांगेष्वनुष्ठीयमानेषुबाध्येत।तस्मा
त्सकृदेवांगानुष्ठानं।तथा।पुरुषार्थकृतत्वाच्चयतः सकृदनुष्ठितैरपप्रयाजैःपुरुषार्थः
कृतएवभवति।पुरुषार्थः पुरुषस्याभीष्टंफलं।तद्धिज्ञानत्रयादिभिरंगोपकृतैः
क्रियते।आराद्उपकारकाणिवांगान्यनेकघटादिप्रकाशकप्रदीपवत्सर्वेषां।सकृदेवो
पकुर्वंतीति सकृदुक्तैरपिपुरुषार्थःकृतएवभवति।तथा।एकार्थसमवाये
तेष्वंगानांतंत्रंभवति।एकोऽर्थोयस्यासावेकार्थःएककफलोयःप्रधानानांसमवा ४६
यःसमूहःस एकार्थसमवायः।तत्र एकार्थसमवायेएकफलेषुप्रधानसमूहे

ऽंगानां तं प्रकृतेः। अंगानां सकृदनुष्ठानं प्रयतः। तथाहि। ता एकविंशती
तिराहुतयो द्वावाघारौ पंच प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्व
दाग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्र
यो नुयाजाः सूक्तवाकः शंयोर्वाकश्चापप यदेवेदः पत्नीसंयाजेषु संप्रगृह्य ति
समिष्टयजुश्चेति। तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षणे एकफले प्रधा
नसमवायेनाहुतीनामेकविंशतिसंख्या श्रूयते। सा चांगानां सकृत्करणाप
रचोपपद्यते। न प्रतिप्रधानं पृथगनुष्ठानपक्षे। तस्मात्प्रधानानां सहप्रयोगे सकृ
दारादुपकारकाणां क्रिया। संनिपत्योपकारकाणां तु प्रतिप्रधानमावृत्तिरिति
उप्रागुक्तमेव। अप्रधानानां सहप्रयोगे कारणान्याह॥ फलकर्मदेशकाल
द्रव्यदेवतागुणसामान्ये। यत्रैकवाक्येन बहूनि प्रधानकर्माण्येकफलसा
धनत्वेन विधीयंते तत्र तेषामितरेतरसापेक्षाणां साधनत्वेन विधानात्

धर्म
कर्मकांड

४५५०

कात्यायनसूत्रव्याख्या
प्रथमाध्यायखंडित

४८ + हि॰म॰ १२६५